नेपालेश्वर-गौरवम्

दृश्यकाव्यम्

(तत्तत्कालीनतत्रतत्रत्यशिलालेखाधारितम्)

नाटककारः

कृष्णप्रसाद शर्मा घिमिरे

कविरत्नम् , विद्यावारिधिश्च

प्रकाशकम्

त्रि०वि०केन्द्रीयसंस्कृतविद्यापीठम्

जाता
ग्रंथालय

नेपालेश्वर-गौरवम्

दृश्यकाव्यम्

(तत्तत्कालीनतत्रतत्रत्यशिलालेखाधारितम्)

नाटककारः

कृष्णप्रसाद शर्मा घिमिरे

कविरत्नम् , विद्यावारिधिश्च

प्रकाशकम्

त्रि०वि०केन्द्रीयसंस्कृतविद्यापीठम्

बेलमुण्ड

प्रकाशकीयम्

पारस्परिकज्ञानस्य विचारविनिमयाय प्राच्यपाश्चात्ययो र्देशयोः संस्कृतविदुषामेकाऽभूतपूर्वा गोष्ठी २०३५ वैक्रमाब्दे तात्का-लिकेन संस्कृताध्ययनसंस्थानेन काष्ठमण्डपे समायोजिताऽऽसीत्। या च " नैपालक-जर्मनसंस्कृतविद्वद्गोष्ठी " ति नाम्ना प्र-सिद्धास्ति।

तस्मिन्नवसरे शर्मण्य (जर्मनी) देशीयेभ्यो विद्वद्भ्यो देशस्यास्य प्राक्कालिक धार्मिक-सांस्कृतिकैतिहासिक-सामा-जिक-राजनीतिकविषयस्य च यथार्थं परिचयं प्रदातुं तात्का-लिकस्य संस्कृताध्ययनसंस्थानस्याऽनुरोधात् ख्यातनाम्ना कविवरेण श्री कृष्णप्रसादधिमिरेण नाटकमिदं विरचितम्। अत्र हि नेपालस्यैतिहासिका बहवो विषयाः सुललितसुरागिरा प्रतिपादिताः सन्ति। प्राक्कालिको नेपालदेशः कीदृश आसीत्, अस्माकं राज्यव्यवस्था कीदृश्यासीत्, तस्मिन् तस्मिन् समये कानि कानि महत्त्वपूर्णानि कार्याणि जातानीति सर्व-मपि वृत्तं नाटकादस्मात् परिज्ञायते। गोष्ठ्यवसरे नाटकमिद-ममिनीतञ्च सफलपूर्वकं जाता चास्य भूरिभूरि प्रशंसा।

नाटकस्यास्य प्रकाशनाय तदानीन्तनं संस्कृताध्ययनसंस्थानं

कविनानुरुद्धम् । संस्कृतवाङ्मयस्य संरक्षणे संवर्द्धने कृतसङ्कल्पेन संस्कृता ऽध्ययनसंस्थानेनानुरोधो ऽयं सहर्षं स्वीकृतः । नाटकस्य मुद्रणञ्च सञ्चालितम् ।

गत-मार्गमासे त्रिभुवनविश्वविद्यालयेन संस्कृताध्ययन-संस्थानं निरस्तम् , तस्य कार्यभारो विद्यापीठेनानेन संप्राप्तः । विविधविशेषतासम्बलितस्य नाटकस्य प्रकाशनायानेन विद्यापीठेना ऽवसरो लब्धः , तदनुसारेण " नेपालेश्वरगौरवमिति नामकं नाटकमिदं प्रकाशितञ्च जातम् ।

आशास्यते नाटकेनानेन संस्कृतपाठकानां जिज्ञासा यथाकथञ्चिदपि परिपूर्णा भविष्यतीति शम् ।

त्रि . वि . वि .
केन्द्रीयसंस्कृतविद्यापीठम् ,
वेलमुण्डीदाङ्गस्थम्

प्रकाशकम्- त्रिभुवनविश्वविद्यालय-
केन्द्रीयसंस्कृतविद्यापीठम् ।

पुनःप्रकाशनादयः सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमावृत्तिः- ३००
प्रकाशनम् - वि.सं. २०४२ माघमासे
मूल्यम्- ७ रुप्यकाणि
मुद्रकः —संस्कृत छापाखाना वेलझण्डी, दाङ्ग

उद्बोधनम्

विघ्ने पुसां जगति च तथा देवताभक्तिभावे
पक्षग्राहभ्रमितमनसां पक्षविच्छित्तिहेतोः ।
इत्यर्धाभ्यां समुपरचितं यन्मुरारीश्वराभ्यां-
मेकं रूपं शरदिजघनश्यामगौरं तदव्याम् ॥

लिच्छविनरेशो गणदेवः वि. सं. ४८७.

किञ्चिद्वक्तव्यम्

पूज्यचरणा उपस्थिता विद्वांसः ! श्रीमत्सुस्वशिरोनमनपूर्वकं किञ्चिद्विनिवेदयामि । शार्मण्य (जर्मन) देशीयाः संस्कृतविद्वांसोऽस्माभिः सह साँस्कृतिकसम्बन्धं प्रगाढं चिकीर्षवो ऽस्मन्नेपालराष्ट्रमभ्यागमिष्यन्तीति कर्णजलिखितं शुभोदन्तं प्रपठ्यैवाऽत्रत्येन तात्कालिकेन त्रिभुवनविश्वविद्यालयान्तर्गतसंस्कृताध्ययनसंस्थानेन वाल्मीकिविद्यापीठेनैकदाऽहमाकारितः कथितश्च तदानीमेव सर्वोदन्तः । अन्ते तेषां शार्मण्य (जर्मन) देशीयविदुषां मनोनुरञ्जनार्थं तानुद्दिश्य सम्पाद्यमाने सांस्कृतिकसमारोहे प्रदर्शनार्थं भवतैकं केवलं संस्कृतविद्वद्भिः कविभिर्भूतपूर्वैर्नेपालनरेशैरेव लिखितं सम्पादितविविधवैषयिकव्यवस्थं विभिन्नदृश्यबहुलं नेपालेश्वरगौरवाभिधेयं नाटकं लिखितव्यम् यद् दृष्ट्वा सभ्यवरा विद्वत्प्रवराश्च सन्तुष्टाः प्रभवेयुरिति ।

तदैवैका समितिर्निरमाय्यस्माभिः । यस्यां संस्कृताध्ययनसंस्थानस्यतात्कालिक ऽ ध्यक्षो (डीन) ऽम्बिकाप्रसादोऽधिकारीसमितेश्चाध्यक्षोबभूव । तत्सहायक उपाध्यक्षस्तोयनाथ पाण्डेयः सदस्योंऽनुसन्धाता दिनेशराजपाण्डेयस्तदन्योऽनराणामेषां लेखकोऽहञ्च तत्सदस्यत्वेन संस्थिताः ।

ततो विषयचयनं विहितमस्माभिरुपरिनिर्दिष्टं यथा । प्राधान्यतः प्राक्तनानां नेपालराज्यशासकानां ये ये नाम शिलालेखाः सम्प्राप्तास्तानेव मुख्याधारस्थानानि विधायैवं नाटकलेखनार्थमहं प्रेरितस्तत्समित्या । मया ऽपि स्वीकृत्य समितेः सानुकम्प तमनुरोधमित्यव्यलेखि प्रस्तुतनाटकम् । तदत्र प्रस्तुतचरणानां तत्रभवतां संस्कृतविदुषां यत्किञ्चिदपि मनस्तोषावहं भवेदिदं तदाहमपीषदेवापि किं नस्यादात्मसन्तोषमनुभवेयम् ।

अपरञ्चाऽत्र लाक्षणिकी नाटकोपयोगिता यथाविध्यनुगता नास्तीति विचारोऽपि संस्कृतविदुषां सहृदयानां हृदयेष्वपि नोद्भवेदिति च विनिवेदयामि । यदज्ञो ऽभूवं कारणातिपातः कार्यक्रमानुबन्धिभिः ॥

वि- सं. २०३५ भाद्र
टङ्गाल-गहिरीधारा
काठमाण्डू,नेपाल

निर्मत्सराणां सता वशंवदः
कृष्णप्रसादशर्मा घिमिरे
कविरत्नम् ,विद्यावारिधिश्च

नेपालेश्वरगौरवम्

(दृश्यकाव्यम्)

—※—

(नान्दी)

नेपालपालपरिपालितभूरिदानीं
विद्योतते जगति शान्तिसुखप्रदेति ।
सेयं सभापि जयति स्वधृतात्मविद्या
शार्मण्यदेशबुधवृन्दसमेधिताऽद्य ॥

(नान्द्यन्ते)

सूत्रधारः— (साभिनयं प्रविश्य) तदलं मङ्गलाशंसनपरं राष्ट्रियरीतिस्थितिनिदर्शकवचनोपन्यासैः । यदहमाज्ञप्तोऽस्मि विद्वद्वर्गैरनत्यैः । वत्स ! अभिनथाचार्य? सोढं सोढमपि बहुविधं कष्टजातं सुदूरात् स्वदेशादत्रागत्य समारोहमयऽस्मिन् रङ्गमञ्चे परितः सुविराजमानैः सभ्यवरैर्विभूषितय विद्वत्परिषद्भवद्भिः सदभिनयकलाप्रदर्शनादिभिः संपरितोष्या । मा नाम भूद्विषये ऽस्मिन् कापि त्रुटिरिति-च। (ऊर्ध्वमवलोक्य किञ्चित्क्षणमात्रं विचारमुद्रां प्रदर्श्यव्यायंतिष्ठति एतस्मिन्नन्तरे प्रोज्ज्वलत्स्वरूपवेषा कृतशिरोवेष्टना नटी सूत्रधाराज्ञा '

तावस्थायामेव प्रविश्य सुभृशं निपीय तदुद्गारं कर्णपुटाभ्यां सविवा रमेकदेशेतूष्णीं वितिष्ठते) तत्सर्वमपि तदानीन्तु मयाऽऽनत शीर्ष्णा "भाग्योदयोऽयं सञ्जातो ऽस्माकंकृते,, इति स्वीकृतं परन्त्वद्याकलितं यद्दुरूहोऽयंक्रियाकलापः, अस्मद्देशीयसर्व्वोच्चगिरिशिखरे पादप्रक्षेप इवा ऽसुकरः आपतितः खल्वस्माकंपरीक्षणकालः (इतस्ततोभ्रमन्] कुतो वैतेषां महामहिमशालिनां विशेषतो वि — द्वन्मूर्धन्यानामनःप्रसादनम् ? कुतोवैतादृङ्ग मह— द्भाग्यासादनम् ?इत्यस्माकं मनोऽपि सदपि सुक्षितं पायं पायमपि " बलवदपि शिक्षितानामा— त्मन्यप्रत्ययं चेतः " इत्यादिकं कविकुलगुरुकालिदासवचनामृतं कातरतामिवैति । अथवा नैतद्युक्तं नदीसन्तरणे पादकम्पनमिव । किं वा कर्तव्यम् ? किं वाऽभिनेतव्यम् तावत्?तदत्र नाट्याचार्या अस्माकं सद्गुरव एव योगक्षेमावहाः प्रमाणानि च । आस्तां तावत्?त एवोपदेक्ष्यन्ति तत्तत्कालोचिताः सदभिनयक्रियाः ।

नटीः— (सा.देवं मदं मन्दमुत्सर्पन्ती, सूत्रधारचरणानुद्दिश्य वद्धाञ्जलिकुड्मलं सा.ष्टुदाभिवादारीति प्रदर्शयन्ती

स्वोभौकनिष्ठाङ्गुली भूमौ संस्थाप्य तन्मुष्ठिस्थाबुप रितनी स्वाङ्गुष्ठौ किञ्चिदुत्थाप्य संयुक्तौ कृत्वा स-र्वाङ्गं नातयन्ती तत्रैव स्वशिरसा प्रणमन्ती)

विजयतां तावदभिनयाचार्यो भवान् ।

सूत्रधारः— (सम्यङ् निरूप्यावलोकयन्नपि स्वरूपतोऽपरिचिन्वन्नेव) विजयस्व देवि?[क्षणादेव देवीति सम्बोधनेनैव त्प्रमादमिवाभिनयन्) का वा भवती भद्रे ?

नटीः— (उत्तिष्ठन्ती सुबद्धाञ्जलिः) तत्रभवतांपरिचा - रिका । कलेति वदन्ति मां नाट्याचार्यो अभिनयकलाविदो भरतादयो महानुभा- वाः । स्वैः स्वैस्तौर्यत्रिककक्रियाभिस्तैरेव क्रीतपूर्वा । परन्तु सर्वदा सर्वथोपास्या च तैरपि । तत्रभवतोऽपि सेवार्थमत्रोपस्थिता सुसमयमवधार्य्य । अकगच्छतु नटाचार्यो भवानपि मां स्वसदगुणवशवदाम् ।

सूत्रधारः— (हर्षातिरेकात् स्वोद्गारमुद्गमन्) महाभाग्यकिलं- तदस्माकम् तद् वन्देऽहं भवतीं चतुःष - ष्ठिकलाजननीम् । यत् साक्षात् भगवती भवती समागताऽस्मद्दर्शनपथं चिन्ताकवलि- तेऽस्मिन् समये । तद्धन्योऽस्मिसञ्जातः ।

(इत्यानतशिरसा प्रणमति सभक्ति) तद् भद्रं वि-
दधातु भवती । देवि तीर्थिकप्रिये !
यथा वयं सफलाभवेम ।

नटी- (भगवत्याश्चतुः षष्टिकलाभिकाया देव्याः समुचितां
सर्वाङ्गीणामालव्यक्ति प्रकाशयन्ती सस्नेहम्)
आम् ? साहं सम्पादयामि सर्वम् । स-
हायिका भवामि च भवतः कार्यक्रमेऽस्मिन्
निश्चिन्तो भवतु भवान् । तद्गच्छाम्यधुना
कार्यसिध्यर्थम् । (इति सम्यानभिगच्छन्ती
हस्ताभ्यां स्वशिरोऽवगुण्ठनं किञ्चिदुत्तार्य संप्रदर्श्य च
स्वं प्रोज्ज्वलतमं मुखमण्डलं च साकमेवैषद्धास्येन
नतशीर्ष्णैवाभिवादनकलां दर्शयन्ती शनैः शनैर्बहिर्नि-
सरति ।)

सूत्रधारः- (साश्चर्यं रङ्गमञ्चं परितो भ्रमन्) केयं देवी-
शारीरिकसंगठनादिकन्तु मद्गृहिण्याः सदृ-
शमिवाभाति । तदपि नाऽहं विषयेऽस्मिन्
किमपि वक्तुं प्रभवामि । तद्भगवती क-
लाधिष्ठात्री देव्येवाऽस्माकं सर्वथा शङ्
करिष्यतीति मन्ये ।

पारिपार्श्विकः- (सुप्रसन्नमुद्रायां प्रविश्य) भावा विजयते-

तरां तावद् भवतां सद्विचारोदयो ऽयम्।

सूत्रधारः- (इषद्रोषं प्रकटयन्निव) को वा सद्विचारोदयः कीदृशो वा विजयते मूर्ख! अविमृश्यैव वस्तुस्थितिमबुद्धैव विषयप्रसङ्गं मध्य एवाऽनर्गलं प्रलपन् कथं वा न लज्जसे?

पारिपार्श्विकः- (साञ्जलिबन्धम्) प्रसीदतां तावद्भवान्। नेपथ्यान्तरितोऽहं सर्वमप्यगूणवं संवादोपक्रमं तत्संहारञ्च। विज्ञातवांश्च सर्वामपि वस्तुस्थितिं विषयप्रसङ्गञ्च। तदेव स्वोद्गारं प्रकटयन्नहं हर्षातिरेकाद् कथये विजयते भवतां सद्विचारोदय इति।

सूत्रधारः- तद् युक्तमभिहितं त्वया (स्वदक्षिणबाहुं तत्स्कन्धे निधाय) मारिष? स्वान्तःकरणसंस्थिता बलवती चिन्तैषा भृशंबाधते माम्। तदत्र किं वाऽभिनेतव्यम्? कथं वा ऽभिनेतव्यम्? कैः कैर्वा साधनैः कया वा लज्जासामग्र्या संपरितोष्येयं सुमहती विद्वत्परिषदिति।

पारिपार्श्विकः- (सुप्रसन्नो भूत्वा) यद्यहमनुज्ञां प्राप्नोमि।

तत्रभवतो नाट्याचार्यस्य यदि वाऽनुच-
रस्याऽपिमनोगतं शृणोति तत्र भवान्,
तन्निवेदयितुमिच्छामि यत् किञ्चिद्भवद्वा-
क्यजातं श्रुत्वैवस्वहृदयाभ्यन्तरे स्फुरितं
विनिश्चितं च मयापि तदेव ।

सूत्रधारः- (स्नेहाभिव्यक्तिप्रदर्शयन्) कथय निःशङ्कम्

पारिपार्श्वकः-(गम्भीरमुद्रया) भाव ? ये नामाऽस्मद्देशीयाः
प्राक्तना नेपालेश्वरा वीरवराः क्षत्रिया
दिग्दिगन्तविजयिनो देशभक्ताः प्रजाव-
त्सलाः प्राच्यसंस्कृतिसंरक्षणसंवर्धनपरा-
स्तत्कृते हुतात्मानः संस्कृतविद्वांसो महा-
कवयश्चाऽसन् केवलं तैस्तैरेव तत्तत्का-
ललिखितां गद्यपद्यबहुलां सुसंस्कृतां-
संस्कृतकृतिमवलम्ब्याऽस्माभिस्तत्तत्स-
मयोचितां देशीयां रीतिं स्थितिञ्च नि-
दर्शयद्भिरभिनेतव्यः सम्प्राप्तकालं यथेति
मदीयो विचारः । तदत्र भवानेव
प्रमाणम् ?

सूत्रधारः- [सहर्षम्) बाढम् ! धन्योऽसि तावत् ।

सुशोभनोऽयं निर्णयस्ते । किलभ्यते वैतादृग्वस्तुनिर्देशनपरं स्वद्वोधात्मकं दृश्यकाव्यम् । यदभिनये सभ्यानामेषां मनोविनोदोऽपि रयाञ्चितोऽस्माकमभिनयकलाप्रदर्शननैपुण्यनैव साकमद्यया-वन्नेपालेश्वरैः सुरक्षिता । राष्ट्रियता च सुदृढा सुस्थिरतरेति च प्रमाणयितुं शक्नुमस्तावत् ।

पारिपार्श्विकः- आम्! अस्त्येव भवद्विचारितमिवैकम् ।

सूत्रधारः- (सहर्षम्) किन्नामधेयं तत्? प्राक्तनंवाधुनिकम्? नवनिर्मितं वा सङ्कलितम्?

पारिपार्श्विकः- नेपालेश्वरगौरवाभिधम् । समारोहस्याऽस्यकृत एव तत्रतत्रत्यशिलालेखेभ्यः संकलय्य नवीनीकृतम् ।

सूत्रधारः- कोऽसौ सङ्कलकः? नवीनीकरणे च सुबद्धपरिकरः ।

पारिपार्श्विकः- अत्रत्य एव । घिमिरे इत्युपाह्वः कृष्णप्रसादनामा संस्कृतकविः । नाट्यकलासङ्कलनेऽपि संप्राप्तशकौलः ।

सूत्रधारः- बाढम् ! विशेषतो भारताजिरेषु बहुवारं

विद्वज्जन परिषत्सु च दृष्टपूर्वोऽसावस्माभिः। तद् युक्तम्। मारिष? विषयमभुमेवाऽधिकित्य सज्जीक्रियन्तां सर्वेऽप्यस्मदीयाः परिकरवर्गाः सम्प्राप्तकालं स्वस्वरूपः सज्जा सम्पादनार्थम्।

पारिपार्श्विकः- यथाज्ञापयति तत्र भवान्।

(नेपथ्ये कोलाहलः श्रूयते)

सूत्रधारः- (कर्णौदित्वा) कीदृशोऽयं कोलाहलः? अवगम्यतां तावत्।

पारिपार्श्विकः- भावः अवगतपूर्व एवाऽसौ। एकविंशत्यधिकपञ्चशतविक्रमसंवत्सरतो द्विषष्ठ्यधिकपञ्चशतविक्रमसंवत्सरपर्यन्तमप्रतिहतगत्या रीत्या च प्रजानुरागिण्या नेपालराष्ट्रभारं परिवहन्नसौ मानदेवाभिधेयोराजराजाधिराजो लिच्छवि वंशावतंसःसर्वानपि विजित्य मल्लपुरीस्थान् नृपतिनिवहान् स्वपुरीं प्रत्यागच्छन् वितरति यथेच्छं नानाविधवस्तु जातं याचकेभ्योऽभावग्रस्तेभ्यश्च। तदेतस्य ग्रहणार्थं

प्रसमागतानां तेषामेव संमर्दात् सञ्जातो ऽयं कोलाहलः । मध्ये मध्ये विश्रूयते च "विजयतां राजाधिराजो मानदेवः" इत्यादिकोऽस्य विजयोद्घोषो जनताकृतः ।

सूत्रधारः— तद् आगच्छ । आवामपि गच्छावस्तावत् सफलीकर्तुं नयनयुगलम् ।

(उभौ शनैःशनैर्निष्क्रमतः)

इति प्रस्तावना

प्रथमदृश्यम्

— ० —

[ततो दृश्यते राजभवनम् । अभितो राजपरिकरैः परिशोभमाना चामरग्राहिणीभ्यां दासीभ्यां वीज्यमाना स्वयोग्यासनस्था राजमाता राज्यवती तत्पार्श्वएवान्यदेकं रिक्तं भद्रासनञ्च सुशोभितं विराजते । तावदेव कञ्चुकी प्रविशति ।)

कञ्चुकी— (राजमातरमभिगम्य) विजयतां देवी राजमाता

[इत्यभिवादनं समर्पयति]

राज्यवती :— [सस्नेहम्] का वार्ता ?

कञ्चुकी :- [हस्तौ बध्वा] देवि ? आर्ताः, सर्वेऽपि मल्ल-
पुरीस्थाः अस्मासु दुर्दृष्टिप्रक्षेपकाः स्वस्व-
प्रजोद्वेजका दुष्टा राजानः

राज्यवती- कथं वा ?

[तावदेव नेपथ्यतो रङ्गमण्डलमभिव्याप्य प्रस्फुटितः
सुमधुरोध्वनिरुज्जृम्भते निस्नाङ्किणशब्दमयः)

जित्वा मल्लपुरीं ततस्तु शनकैरभ्याज-
गाम स्वकं
देशं प्रीतमनास्तदा खलु धनं प्रादा द्वि-
जेभ्योऽक्षयम् ।

कञ्चुकीः- [तदवसाने] इत्थमित्थम्

राज्यवती :- सुस्पष्टमभिधीयताम्

कञ्चुकीः- (सम्यानभिमुखीभूय,) स्वमुखेनैव पुनः सलयं
तमेवश्लोकार्धं गायति- जित्वेति ।

राज्यवती :- [सुप्रसन्नमुखमुद्रया) तद् गृहाणेममुपहारं मत्पु-
त्रस्य विजयवार्ता श्रावणार्थकम् ।

(इति स्वाङ्गुलितो हीरकसंलग्नसुवर्णमुद्रिकां निष्का-
स्य ददाति ।)

कञ्चुकी :- [तां विगृह्य) वर्धतां देवी राजमाता विं-
शत्यधिकशतायुषा, परिजनाशापूरकर्शाले-

नैतादृशेन च । (ततः प्रविशति मल्लपुरीविजेता नेता च लिच्छविवंश्यानां राजाधिराजो मानदेवः]

सर्वे :- (समकालमेव) विजयतां राजाधिराजः

मानदेवः - (अग्रे गत्वा स्वमातु राजवत्या पादाभिवन्दनं विधाय साञ्जलिबन्धम्) मात ! भवत्याः शुभाशीर्वादो भृशं विजयते विजृम्भते च रणभूमिमभितः । यत्प्रभावात्सर्वेऽपि शत्रवो भृशं परास्तास्तत्रतत्रत्या राज्यसञ्चालनव्यवस्थाऽपि यथाबुद्धि मया सुदृढा सुस्थिरैव सम्पादिता । अभावग्रस्ताश्चतैस्तैरावश्यकवस्तुभिः समृद्धाः कारिताः । विशेषतस्तत्रत्याः सर्वेऽपि परमुखानपेक्षिणोविहिताः तदत्र भवती स्नेहभाजनं मामपि पुनरभिवर्धयतां शुभाशीराशिभिः

(इति साञ्जलिबन्धं स्वशिरोनमनपूर्वकं वितिष्ठते)

राज्यवती- (सगद्गदहृदया स्वोभौ हस्तावुत्थाप्य)

वत्स ! वर्धस्व सत्क्रियाभिः सदाचारपरिपालनानुगताभिः ।

मानदेवः- [सोल्लासम्] भवत्याऽम्ब ! " त्वमपि

सन्नहृदया दानं प्रयच्छ स्वतः ,, ।

(इति स्वमुखेनैव सत्यं सुमधुरं व्याहरति , श्रुत्वा सर्वेऽपि सुप्रसन्नहृदयाः सञ्जायन्ते)

राज्यवतीः– धन्याऽस्मि त्वया वत्स! तद्यथेच्छं वितराम्यहमपि स्वविषयस्थितेभ्योऽभावग्रस्तेभ्यश्च तत्तद्वस्तु जातम् । गच्छामस्तावद् आवश्यकक्रियासम्पादनार्थमधुना ।

(इति सर्वेऽपि निर्गच्छन्ति)

इति प्रथमदृश्यम्

–०–

[तच्च– भक्तपुरान्तर्गं चाँगुनारामन्दिरस्थशिलालेखात् वि . सं. ५२१– ५६२ मयात् तद्राज्यकालात्संकलितम्

अथ द्वितीयदृश्यम्

[काष्ठमण्डपकेल्टोल (स्थान) स्थम् । तेनैव मानदेवेन प्रजार्थे जलप्रणालिका निर्माणनैमित्तिकादङ्कितशिलालेखाद् गृहीतम्]

ततो युगपदेव प्रविशत इतस्ततो भ्रामं भृशं श्रान्तौ तृषितौ च द्वौ पथिकौ प्रायोऽपरिचितपूर्वौ तत्रत्यैरपि

प्रथमः– (उपसर्प्य)प्रणमाम्यहम् । को वा तत्र भवान्?

द्वितीयः– (सस्मितम्) गृह्णातु मदभिवादनमपि । अहमस्मि काष्ठमण्डपतः किञ्चित्पश्चिम-दिङ्निवासी पथिकः ।

प्रथमः– अहन्तु पूर्वं देशादागतोऽस्मि । भगवन्तं जगदीश्वरं पशुपतिनाथं समर्पयितुं स्वात्मानमेव । भृशमुत्कोऽस्मि गृहस्थभारवहनात् । इतोऽन्तर्द्वन्द्वौ च सुख दुःखानुभवरूपौ प्रबाधेत एव । अहह! पिपासाऽपि वर्धतेतराम् । इतस्ततः कुत्रापि न दृष्टः किं कूपः सरित्प्रवाहो वा निर्झरोभवता?

द्वितीयः– अहमप्यस्मि तादृगेव तृषितः । प्रखररुष्णरश्मेर्भगवतः सूर्यस्य किरणैरपि संतापितवर्ष्मा च । पातुमिच्छामि सुशीतलं जलम् । परन्तु मार्गणेऽपि बहुकालं यावन्न दृष्टं मया जलाधारमितस्तु । तत् कञ्चित्कालमत्रैव सुशीतलस्य घनपत्रपुटस्य वटवृक्षस्याऽधःस्थित्वा विश्रम्य च जलप्रणालिकां स्रोतो वा परिमार्गयिष्यन् को विचारस्तत्रभवताम् ?

प्रथमः– युक्तमभिहितं तत्रभवता । तत्रैव क्षणमात्रं

तिष्ठाव:

(इत्युभौ निवसतः । तावदेव नेपथ्ये कोलाहलो विश्रूयते तत्तत्स्थलनिवासिप्रजापिपासानिरसनजन्य-सुखसमृद्ध : " संवृत्तः संवृत्तो राजाधिराजो मानदेवोऽपि द्वितीयो जलद इव संवृत्तः,,इत्यादिशब्दमयः ।)

द्वितीयः— अवगतः किं भवता कोलाहलस्यार्थः ?

प्रथमः— न मया सम्यगवबुद्धः । तद्भवान् स्पष्टीकरोतु कृपया ।

द्वितीयः— (सोत्साहम्)अधुनातनोऽत्रत्यो राजा जनतातृष्णिरसनशीलत्वात् तादृशेनैव स्वकर्मणा द्वितीयो देवो यथा बभूवेति संप्राप्तसुखानामत्रत्यानां जनानां हर्षध्वनिसमुत्थोऽयं कोलाहलः।

(नेपथ्ये पुनः सुमधुरं सुस्पष्टं विश्रूयतेऽधस्तनश्लोकार्धः)

दुष्टानां सुनयेन शास्त्रविहिते यो संग्रहे संरतः
शुद्धात्मा प्रकृतेः पितेव दयते श्रीमानदेवोनृपः ।

प्रथमः— धन्योऽसौ नृपः । तदावामपि गत्वाजलप्रणालिकां स्वचक्षुर्षव निरीक्ष्य परीक्ष्य च तत्रत्यां वस्तुस्थितिं पिपासां निरसयाव : ।

द्वितीयः— अग्रे भवतु भवान् । इत इतः ?

प्रथमः— नहि नहि भवानग्रे ।

सुप्रसिद्धो मानदेव

द्वितीयः— न हि न हि भवान् ।

(इत्युभौ निष्क्रमतः)

(ततः पटान्तराक्षेपे भृशं विजृम्भमाणो जनसंमर्दो दृश्यते श्रूयते चास्पष्टरूपेणैव निरन्तरं वर्धमानः कोलाहलः । दृश्यन्ते च तत्रत्याः सर्वेऽपि जनाः पायं पायममृतमिष्टं सुशीतलं जलं प्रणालिकामभितो राज्ञो गुणान् गायन्तोऽनुभूय परमसुखं परस्परं स्वमनोऽनुकूलं भाषमाणाः । इमौ पथिकावपि पिबतो नवप्रणालिकाप्रसृतं सुस्वादु तज्जलम् । तावदेव तदानीन्तनो नगरपालः शिलापत्राङ्कितं सदपि प्रणालिकाग्रभागे सङ्गृहीतप्रतिलिपिकं तदभिलेखपट्टं स्वहस्ताद्ग्रामिकहस्ते निदधाति [स च गृहीत्वा निम्नाङ्कितं तमभिलिखं सुस्वरं पठित्वा तत्रत्येभ्यः सर्वेभ्यः श्रावयति ।

स्व प्राणैरपि लोकरक्षणकृते कार्येषु युक्तात्मना
सर्वाञ्छत्रुगणान् रणे जितवता क्ष्मां रक्षता सर्वदा ।
तेनेदं श्रुतिधर्मशास्त्रविहितां धर्मक्रियाङ्कुर्वता
लोकानां सुखकाम्यया सुविमलं पानीयमानाम्यत ॥

(पटाक्षेपः)

(इति द्वितीयदृश्यम्)

(महाराजस्यास्यशासनकालः पूर्वमेवप्रस्तावनायां निदर्शितो वर्तते । तत्रैव द्रष्टव्यः ।)

अथतृतीयदृश्यम्

(सुपवित्रकर्मा लिच्छविनरेशोऽयमंशुवर्मा । तच्छाशनकालो वि. सं. ६६३-६७९ यावत् । दृश्यमिदं विशालनगरापरपर्याय हॉडीग्रामदेवपत्तनस्थशिलापट्टाभ्यांसङ्कलितम्)

(ततः सुविशालं प्रोज्जलत्स्वरूपं सुप्रसिद्धं कैलासकूटभवनं विदृश्यते । यत्सभायां संस्थिता राज्ञोंऽशुवर्मणः शुभागमनं प्रतीक्ष्यमाणाः सर्वेऽपि सभासदो राजपुरोहिता मठाधीश्वरा देवपूजकाः संप्राप्ततत्तद्ग्रामाधिकारिणो राज्याधिकारिवर्गास्तथाऽन्ये प्रतिष्ठिता नागराश्च सुरूपवेषः सवर्गसंमिलिता दृश्यन्ते परस्परं सम्भाषमाणा गायन्तश्च तद्गुणगणान्)

प्रथमःसभ्यः- धन्यो ऽस्माकं महाराजः । यद्विचारः सर्वदैव स्वप्रजाजनाः कथं सुखिनो भवन्ति ? कथं वा स्वस्वसत्कर्माभिरताः प्रवृत्तिमाश्रित्य निवृत्युन्मुखाः सञ्जायन्ते ? इत्यादिकेषु विषयेष्वेव भ्रमन्नाभिवर्धते ।

अन्यः सभ्यः- अस्मद्भागधेयमेवैतदपि । यत्प्रेरणयैवाऽप्राप्यस्माभिरेतादृशो राजा ।

इतरः सभ्यः-सत्यमुक्तंभवता

प्रथमः- एतत्तु हॉडीग्रामस्थिततद्विलिखितशिला -

फूलकादेव ज्ञायते सर्वैरपि तत्र संप्रवृत्त-
दृष्टिभिः ।

द्वितीयः— सभायामेवाऽस्यां संस्थिता वयमेकवारं शुश्रू-
षवः समस्तमभिलेखम् । स्वकण्ठस्थित-
तत्पद्या बुधाग्रगण्या भवन्तः श्राव-
यन्त्वस्मानिति मदीया ऽभ्यर्थना भवतु
स्वीकृता ।

एको बुधः— (स्वासनतः समुत्थाय) शृण्वन्तु पूज्याः
सभ्याः?(स्पष्टं सुमधुरं गायति)

प्रजाहितार्थोद्यतशुद्धचेतसांऽ
शुवर्मणा श्रीकलहाभिमानिना ।
कथं प्रजा मे सुखिनो भवेदिति
प्रियव्यवस्थेयमकारि धीमता ॥

(सर्वेऽपि सभ्याः श्रुत्वैवा ऽमुं श्लोकं " धन्यो ऽ सौ राजांशुवर्मा संप्रदत्तविषयशर्मा संसूचितेङ्गूशुकर्मा " इति तारस्वरं स्वोद्गारं प्रकटयन्ति ।)

कश्चित्सभ्यः— बुधाग्रगण्याः ? श्लोकेऽस्मिन् प्रदत्त वि शे-
षणस्य श्रीकलहाभिमानिनेतिशब्दस्य को
वा भावो भवेदिति ज्ञातुमिच्छामि

श्लोकपाठकः—(सस्मितं) स्थान एव पृष्टं भवता ।

छ्रूयताम्-लक्ष्मीसरस्वत्योः सुप्रसिद्धमेव पुरातनं वैमनस्यम् लक्ष्मीप्रियाः प्रजाः प्रायशः सदालस्यपराः पुरुलम्पटाश्च भवन्तीति हेतोर्मद्विषयस्थाः प्रजाजना विशेषतो निर्धनाः सन्तोऽपि सुशिक्षिता भवेयुर्नतु धनलोलुपा नाप्यसत्क्रियापराः । सैव वरा स्थितिर्नतु प्रथमेति विचार्य राज्ञा स्वयं संस्थापितोऽयं विशेषणशब्दः । इत्यवगम्यते ।

सर्वे— (समकालमेव) तद्धन्यो ऽ सौ धन्यो ऽ सौ

(तदन्यजन्योच्चस्वरेण संमिलितोध्वनी राज्ञोऽन्तःपुरमभिव्याप्नोति। तदैव श्रुत्वैव सं संवारितराजराजोचितवेषभूषोल्लिच्छविनरेन्द्रोलङ्कारभूतो राजाधिराजोऽशुवर्माऽभ्रंलिहात् कैलासकूटभवनाभिधेयात् स्वप्रासादाट्टालिकात् स्वं दर्शयति प्रजावर्गेभ्योऽवनेभ्यश्चाधः स्तनेभ्यः। सर्वेऽपि दृष्ट्वैव राजानं "विजयवां, राजाधिराजोंशुवर्मेति सतारस्वरं निगदन्ति। तद्विश्रान्तौ प्रासादोपरिष्ठादेव महाराजो मृदुस्वनं निम्नाङ्कितं वाक्यजातं स्वमुखारविन्दादेवोद्घोषति सर्वानपि सभ्यवर्गान् सम्बोध्य।

ॐ स्वति ! कैलासकूटभवनादनिशि

निशचानकशास्त्रार्थविमर्शविसर्पितसद्-
दर्शन तया धर्माधिकारस्थितिकारणमेवो-
त्सवमनतिशयं मन्यमानोभगवत्पशुपतिभट्टा-
रकपादानुगृहीतावप्यपादानुध्यातश्च्यंशु-
वर्मा कुशली-, पश्चिमाधिकरणवृत्तिभुजो
वर्तमानान् भविष्यतश्च यथार्हंकुशलमा-
भाष्य समाज्ञापयति गृहक्षेत्रिकादिकुटुम्बिनः
सर्वानपि- विदितं भवतु भवताम् ।

कृतोऽयं मर्यादाबन्धः शासनपत्रेणै-
तेनैव भवद्भिर्व्यवहर्तव्यम् । तत्र भगवतः
पशुपतेर्दोलाशिखरस्वामिनो, गुम्बिहारस्य,
श्रीमानविहारस्य , श्रीराजविहारस्य ,
खजूरिकाविहारस्य मध्यमविहा -
रस्य , सामान्यविहाराणां , रामेश्वरस्य,
हंसगृहदेवस्य मानेश्वरस्य , पर्वतेश्वरदे-
वस्य , नरसिंहदेवस्य , कैलासेश्वरस्य ,
भुक्मुक्तिकाजलशयनस्य तदन्य कुलानां
श्रीभट्टारकपादानां , सपेलापाश्चात्याः

सामान्यपाञ्चाल्या राजकुलवस्तुना नियुक्त-पुरुषस्य गोष्ठिकाणां कृतप्रासादस्य ब्राह्मणान्तं सामान्यपुरुषाणां च यथार्होभागो देयः । न चाऽयं मर्यादाबन्धो ऽन्यथाकरणीयः । (इत्युपरिष्ठादेव" यथाभागं गृह्णन्तु भवन्तः" इत्युद्घुष्य देवो वृष्ठियथा महाराजोंशुवर्माऽपि सभाङ्गने स्वहस्तादेकवारमेव द्रव्यराशिवर्षति । ततोऽन्तर्हितो भवति । इतः सर्वे सभासदो मठ-मन्दिर विहार-चैत्यक्षेत्रादीनां प्रतिनिधित्वं कुर्वन्तो यथा हं स्वं स्वं भागं प्रधानराज्याधिकारिहस्तात् संगृह्य स्वस्वस्थानं प्रत्युद्गमनाय शनैः शनैः सभा गृहान् निःसरन्ति ।]

(पटाक्षेपः)

इति तृतीयदृश्यम् ।

चतुर्थदृश्यम्

(अयं सुविख्यातनामा लिच्छविनरेशो जयदेवः । तच्छासनकालो वि. सं. ७७१–७९० यावत् । दृश्यमिदं भगवत्पशुपतिनाथमन्दिरस्थाच्छिलालेखाद्गृहीतम् । यस्मिन् सर्वप्रथमं समुज्ज्वलं सुविशालं भ्रमद्भक्तवृन्दं स्तुतिपाठकैरन्यैश्च ब्राह्मणवर्गैरभितो विहित बहुविधाराधनं संमिलदवधूतगणं सुगन्धिभिर्धूपादिभिः स्वहस्तनिर्मितलक्षवर्तिकाप्रज्ज्वालनक्रियाभिः संशोभितं दर्शकानाह्लादयद्भगवतः पशुपतिनाथस्य सुन्दरतमं मन्दिरं पुरो विदृश्यते। विशेषतोऽवधूतवेषामहात्मान एवेतस्ततो वम्भ्रम्यमाणाः सुशोभन्ते । अन्तर्मन्दिरप्राङ्गणेऽस्मिन्नेवैकोऽहम्मन्याभिमानी कश्चिद्धनिकः स्वपादपीठे लुठन्तमस्फुटस्वरेण किमपि प्रार्थयन्तमिवैकमुन्मत्तवदभिलक्ष्यमाणमवधूतं तिरष्कुर्वन् दृश्यते ।)

धनिकः– [ईषद्रोषं प्रकटय्य] कापुरुष ! कस्त्वं ? किमर्थं कदर्थयसि माम् ?

अवधूतः– (उत्थाय साञ्जलिबन्धम्।) महापुरुष ! नहि, नहि ,नाऽहं कदर्थयामि सर्वातिशायिनं महापुरुषं भवन्तम् । परन्तु परन्तु !

(किञ्चित्क्षणं तूष्णीमवलम्बते । तावदेव दाम्भिको मनिकः स्वं धार्मिकतमं विख्यापयमानो जनेषु मन्दिरप्रदक्षिणाभिषेण तत्क्रममवलम्ब्या ऽग्रे ऽग्रे प्रचलति । अवधूतो ऽपि साञ्जलिबन्धमेव तमनुसरति । तत्रत्याः सर्वेऽपि दर्शं दर्शं तद् दृश्यजातं श्रावं श्रावं तयोः संवादक्रमं शनैः शनैस्तावनुसरन्तो मन्दिरप्रदक्षिणां कुर्वन्तो दृश्यन्ते ।)भगवन्? महापुरुष ! अत्रत्योजगदीश्वराभिधेयो भगवान् पशुपतिः कर्तुमकर्तुमन्यथाकर्तुं समर्थतमो ऽस्मीति मन्यमानो व्यर्थमेव भवादृशं महापुरुषमपि कदर्थयितुमित्थं रूपेणैव मां प्रेरयन्नास्ते । तदत्र दोष्यसौ ।

(इति स्वहस्तेन मन्दिरस्थं भगवन्तं दर्शयन्)

नाऽहं कापुरुषो दोषी । (इति स्रवदश्रुधारं किञ्चिदग्रेभूत्वा तन्मार्गमवरुद्ध्य सुस्वरं पठति-)

दण्डिताः खण्डिताः सर्वेऽहंबुद्धा भूधरा वराः ।
क्रियन्ते साधुना यावत् तदयं दण्डमर्हति ॥

(पुनर्भगवन्तं दर्शयन्)तवनेकविधद्रव्यवैभवसमृद्धोभवान् कापुरुषस्याऽस्येत्थं प्रलपितमपि युक्तिमदवधार्य .... ।

[इति विरमति]

(इतो दर्शकभक्तवृन्दमात्मानमेव कथितमिवाकलय्य लज्जाविनतमुखं संस्मृतभगवत्पादारविन्दं दर्शं दर्शं तथोस्तादृशीं स्थितिं किञ्चित्क्षणं सुस्थिरं- वितिष्ठते।)

(सत्योऽयं महात्मावधूत इति विचार्य विनष्टाभिमानो तत्पादौ गृहीत्वा-)

धनिकः- किं वा वदति भवान्?

नाऽहं स्मृतवान् भगवन्। (किञ्चिदुत्थाय)

निर्दिशतु तावदेनं जनमपि महामोहगर्ते निपतन्तम्। (इति नयनयोरश्रूणि पातयन्ति)

अवधूतः- (तत्स्नेहेनाविष्टचेतास्तत्कन्धे स्वहस्तं निक्षिपन्)

भो धार्मिकैतत् तपसा न याति
न चेज्यया निर्वपणाद् गृहाद्वा।
न च्छन्दसा नैव जलाग्निसूर्यै-
र्विना महत्पादरजोभिषेकम्॥

श्लोकतात्पर्य्यमवगतं किंभवता?

धनिकः- (पुनरवधूतपादयोः पतति) भगवन्। अवगतं मया स्वहृदि संस्थापितश्च तदर्थः।

(इति स्वहस्ताभ्यां तच्चरणरेणून् मूर्ध्निनं संस्थापयति)

तथैव सम्पादयितुं च स्वजीवनं प्रयतिष्ये।

(दर्शकगणा अनित्येऽस्मिन् संसारेस्वात्मोद्धाराय

तादृशानां महात्मनां श्रीचरणरेणव एवोपास्यास्त एवोपासकान् सद्गुरवो भूत्वा संतारयिष्यन्ति संसार सागरत इति ।

(स्वान्तः करणे संस्थापयन्ति ।)

मन्दिरद्वारपालः– (द्वारत एवाऽवस्तनं वाक्यकदम्बमुद्घोषयति)

भो भो भक्तगणा महात्मनश्च ! लिच्छविनरेशोराजाधिराजो जयदेवः पशुपतेर्भगवतः श्रीचरणयोरात्मानं समर्पयितुं महाराजोपचारैस्तत्पादयोः पूजां विधातुञ्च स्वमात्रा सहैव परिजनैः समागच्छति । तद्भवद्भिः सावधानैर्भवितव्यम् ।

(ततः प्रविशति तथाविधो जयदेवः)

सर्वे भक्तगणाः– (समकालमेव) **वर्धताम् राजाधिराजो जयदेवः** (राजाधिराजो जयदेवो मन्दिरप्रदक्षिणां विधाय दक्षिणद्वारतो भगवन्मूर्तिसमीपं गत्वा राजपुरोहितादिभिर्देवपूजकैश्च सम्पादितसमस्तकृत्यं पूजास्थानमितस्ततो निरीक्ष्य संस्थापिते तत्रत्यशुभासन उपविश्य राजपुरोहितहस्ताभ्यां प्रदत्तं बहुपत्राङ्कितं विशालं दर्शनीयतमं राजतकमलं स्वहस्ताभ्यां गृह्णाति ।)

लिच्छविनरेशो जयदेवः

राजाजयदेवः (स्वासनादुत्थाय समक्ति सश्रद्धं श्लोकानधस्तनान् सुस्वरं सलयं पठति)

देवं वन्दितुमुद्यतो द्युतिमतो विद्योतमानद्युतिः
किं ज्योत्स्नाधवला फणावलिरियं शेषस्य सन्दृश्यते ।
अन्तर्दूररसातलाश्रितगते देवप्रभावश्रिया
किं क्षीरस्नपनं विधातुमुदिताः क्षीरार्णवस्योर्मयः ॥
यं स्तौति प्रकटप्रभावमहिमा ब्रह्मा चतुर्भिर्मुखै
र्यं च श्लाघयति प्रणम्य चरणे षड्भिर्मुखैः षण्मुखः
यं तुष्टाव दशाननोऽपि दशभिर्वक्त्रैः स्फुरत्कन्धरः
सेवांयस्यकरोति वासुकिरलं जिह्वासहस्रैः स्तुवन् ॥
तस्येदं प्रमथाधिपस्य विपुलं ब्रह्माब्जतुल्यं शुभं
राजद्राजतपङ्कजं प्रविततप्रान्तप्रकीर्णदलैः ।
पूजार्थं प्रविधाप्य तत्पशुपतेर्यत्प्रापि पुण्यं मया
भक्त्या तत्प्रतिपाद्य मातरि पुनः संप्रापये निर्वृतिम् ।

(इति भगवत्पादयो समर्पयति । ततः स्वमातुः श्रीवत्स देव्या अभिमुखीभवति निगदति च हस्तौ बद्ध्वावाक्यमिदम्।) मातः ! अत्रत्यं सर्वमपि पुण्यं भवत्पादयोः समर्पितं मया ।

तदभिवर्धयेमं स्वपुत्रमपि सदाशिषा

(इति सश्रद्धं प्रणमति)

श्रीवत्सवती (हर्षाश्रूणि पातयन्ती) वत्स ! वर्धस्व सत्कर्मणा सदायुषा च । (ततो देवी राज्ञी माता ऽपि राजोपचारैर्भगवतोभवानीपतेः पूजां विधाय बहुविधं राजतं सौवर्णञ्च पूजोपकरणं भगवत्पादयोः समर्प्य ततः संप्राप्तं पुण्यमपि स्वर्गताय स्वपतिदेवाय समर्पयति । ततो नेपथ्ये वैतालिकैः सुपठितो ऽयं सुस्वरः श्लोको विश्रूयते ।)

पुण्यं पुत्रेण दत्तं शशिकरविमलं कारयित्वाऽब्जमुख्य
प्राप्तं शुभ्रंशुभञ्च स्वयमपिरजतैः पद्मपूजांविधाय ।
सर्वंश्रीवत्सदेवी निजकुलधवलां चित्तवृत्तिं दधाना
प्रादात् कल्याणहेतोश्चिरमवनिभुजे स्वामिने स्वर्गताय।

(ततः सर्वे ऽपि मन्दिराद्बहिर्निःसरन्ति)

पटाक्षेपः

(इति चतुर्थं दृश्यम्)

पञ्चमं दृश्यम्

(मल्लवंशीयो ऽयं राजा स्थितिमल्लः । अस्य शासनकालः वि. सं. १४३७–१४५२ यावद्दृश्यते

दृश्यमिदं काठमाण्डूजयवागीश्वरीमन्दिरसमीपस्य जलप्रणालिकाशिलालेखाद् गृहीतम् ।

(ततो दृश्यते भगवत्या जयवागीश्वर्या मन्दिरम् । तत्समीपस्था जलप्रणालिका च । तत्रतत्रत्यैर्नागरिकैर्ग्रामवासिभिश्चेतस्ततो वम्भ्रम्यमाणं राजपुरुषैः कारितसुप्रवन्धं जलप्रणालिकोद्घाटनमयं सुशोभनसमारोहमयं दृश्यम् । तज्जन्यजनसंमर्दश्च ।)

एको दर्शकः अद्याऽत्र किं भविता !

अन्यो दर्शकः श्रूयते ऽद्य राज्ञः स्थितिमल्लस्य हस्तादस्या जलप्रणालिकायाः समुद्घाटनं क्रियत इति ।

(तावदेव नेपथ्ये मल्लनरेशावतंसभूतो महाराजः स्थितिमल्लः स्वैः परिकरैः संसेव्यमानः समारोहे अस्मिन् समायाति तदत्रभवद्भिः सावधानैर्भाव्यमित्यादीनि वाक्यानि श्रूयन्ते ।) (ततः प्रविशति तथा संस्तुतो राजा स्थितिमल्लः । राजपुरोहितादिभिर्गणपतिपूर्वकान् क्षेत्रपालादिदेवान् संपूज्य विधिवन्नृपतिस्थिति मल्लकरकमलान्नवजलधारासमन्वितायाः प्रणालिकायाः समुद्घाटनं कारयित्वा सम्पन्ने क्रियाकलापे

राजा सुरवरं सलयं पठति स्वयमधस्तनौ श्लोकौ ।)

राजल्लदेव्यास्त्रिदिवं बताया-
स्तस्याः सुधापानसमृद्धयेऽस्याः
नाम्ना ऽकरोच्छ्रीस्थितिराजमल्लः
प्रणालिकां हेममयीं सुदीर्घाम् ॥
महाप्रयत्नेन जलं सुदूराद्
भगीरथो गाङ्गमिवेशमूर्ध्नः ।
आनीय चाष्टाङ्गगुणैरुपेतां
सुदुर्लभां दिव्यजलप्रवाहाम् ॥
एतेन सत्कर्मणा राजल्लदेव्या अनन्तकाल यावत् सुधापानसमृद्धिर्वर्द्धयतामिति
(स्वयमुद्घाटयति) ततः सर्वे तज्जलानि पिबन्ति ।

पटाक्षेपः

(इति पञ्चमं दृश्यम्

(मल्लशिरोमणि नंरेशो रणमल्लः । अस्य शासन-
कालो वि. सं. १५४२-१५८० यावत् । दृश्यमिदं
तद्रचितपाण्डवविजयनाम्नो नाटकात् संकलितम् ।-
तच्चभक्तपुरनगरात् पूर्वदिशि वर्तमानाद्वनेपाप्रदेशान्त-
र्गतराजभवनसमीपस्थम्

(सर्वप्रथमं पुरतो भगवतो विनायकस्य सुवि
शाला मूर्तिर्दृश्यते । सा च सिन्दूररक्तचन्दनरक्त-
वस्त्रादिभिः सुपूजिता दर्शकभक्तजनमनसामाह्लादिनी
विराजमानाच विलोततेतराम् । नान्दीपाठानन्तरं
तस्या एव पृष्ठभागात् सपरिवारो भगवान् वि-
नायको बहिरागच्छति ।)

विनायकः (इतस्ततो विलोक्य) धन्येयं विद्वत्परिषत् ,
विशिष्टशिष्टसंस्कृतविद्वद्भिः परिवृता ।
तदाह्वयामि तावत् सहयोगिनम् । भो !
भृङ्गिन् ! हे मुने ! इत आगच्छ ।

भृङ्गी (ससम्भ्रमं प्रविश्य) भगवन् गणपते ! कि-
मादिशसि !

विनायकः श्रूयतां मद्भारती

(ततः प्रविशति नट्या सहैव सूत्रधारः ।)

सूत्रधारः (नटी मुद्दीश्य) प्रिये ! अस्त्येतच्छ्रूयतां श्रीमता श्री श्री जय रणमल्लदेवेन राज्ञा स्वयं विलिख्य गीतवाद्यनृत्ययोजितैस्तौर्यत्रिककलाविद्भिरप्यनिशं समुपास्यमानंनाटचरसोपबृंहितं पाण्डवविजयं नाम नाटकमद्यनाटयिव्यम्

नटी यदाज्ञापयतिभवान्

सूत्रधारः तद्गच्छावः कार्यसम्पादनार्थम् ।

इत्युभौ निर्गच्छतः

पटाक्षेपः

इति षष्ठं दृश्यम् ।

सप्तमदृश्यम्

(अयमपि मल्लनरेशावतंसः श्रीजगज्ज्योतिर्मल्लः । अस्य शासनकालो वि. सं. १६७१–१६९२ यावत् । दृश्यमिदं तल्लिखितसंगीतरससंग्रहनाम्नः पुस्तकान्निष्काशितम् ।)

ततो दृश्यते राजभवनम् । तदास्थानं भव्यतमञ्च । यस्मिन् सुसज्जिततौर्यत्रिकविद्वांसोयथास्थानं संस्थिताः सुशोभमाना परिदृश्यन्ते । तदैको गायकः सर्वप्रथमं महाकवेर्जयदेवस्य सुविख्यातगीतगोविन्दकाव्यस्थमधस्तनं श्लोकं भैरवरागे विपञ्च्यां गायति सुमधुरम् ।)

पूर्वं ह्यत्र समं त्वया रतिपतेरासादिताः सिद्धयस्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः ।
ध्यायंस्त्वामनिशंजपन्नपि तवैवालापमन्त्राक्षरं भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति ॥
रतिसुखसारे गतमभिसारे मदनमनोहरवेषम् ।
न कुरु नितम्बिनि! गमनविलम्बमनुसरतं हृदयेशम्॥
धीरसमीरे यमुनातीरे वसति वने वनमाली ।
गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली ॥

(मध्य एव नेपथ्ये)

भो भो सभ्यामहानुभावाः मल्लनरेशावतंसः श्री श्री जगज्ज्योतिर्मल्लो राजराजेश्वरः सभास्थानं समागच्छति । तदत्र भवद्भिः रवहितैर्भाव्यम् ।

(ततः प्रवशति सपरिकरो राजा जज्ज्योतिर्मल्लः सर्वे स्वासनादुत्थाय तस्मै सदभिवादनं समर्पयन्ति । कथयन्ति च वर्धताम् !! महाराज इति ।)

राजा– (अवनतशिरसा) अनुगृहितोऽस्मि (स्वासन उपविशति) ततः सर्वेपि स्वे स्वे स्थाने तिष्ठन्ति । किं किं वोद्गीतंभवद्भिः

एकोगायकः–[हस्तौबद्ध्वा] नान्यत् महाराज ! ऋते चैकं श्री महाकविजयदेवनिर्मितं देवी भगवतीं राद्धु भगवदभिमुखीकर्तु सक्षमं गीतं " रतिसुखसारे " इत्यादिकं मुद्गीतम स्माभिः श्रुतश्चतदेव ।

राजा– अहमपि शुश्रूषुरस्मि । तदन्तिमं गीतमवशिष्टम् । [ततो विपञ्चीं सहभिः " सा रे ग म प ध नि से ति स्वरैः सनाथ्यां कृत्वा गायति प्रधानो गायकः ।)

श्रीजयदेवे कृतहरिसेवे भाणितिपरमरमणीयम् ।
प्रमुदितहृदयं हरिमतिसदयं नतम सुकृतकमनीयम्।।

(राजा गद्गदचेतसा धन्योऽसौ महाकविरिति-ववति । ततः साञ्जलिवन्धं प्रार्थयति महाराजं प्रधानो गायकः पुरःस्थितांभगवतः

प्रधानोगायकः-(पशुपतेर्भव्यप्रतिमां लक्ष्यीकृत्य) महाराज ! भगवन्तमुद्दिश्य भवता विरचितं " संगीतरससंग्रह ,, स्थं गीतमेकं श्लोकमयमेव किं नस्प्राद्वयमपि श्रोतुमिच्छामो भवन्मुखारविन्दादेव ।

(विपञ्चीं राज्ञः पुरः स्थापयति ।)

राजा- (प्रसन्नमुद्रायां) आम् ! स्वीकरोमि । परन्तु नाहं भवत्सदृशो गायकः । तथापि भगवतोविश्वगुरोराराधननैमित्तिकं किञ्चिद्गायामि तावत्। (इति विपञ्चीं प्रगृह्य तस्यां सप्तस्वरान् सन्धाय सुस्पष्टं सुमधुरं सलयमवस्तनं श्लोकमेकमात्रं गायति ।)

उद्गच्छत्पुलकाङ्कुरः स्मितमुखः श्रुत्वाजश्वं मङ्गलं
गौरीलोचनचञ्चलाञ्चलमिलश्चारो विवाहोत्सवे ।
यः पाणिग्रहणच्छलेन कुरुते तस्याः कराकर्षणं
प्रोद्यद्बालसुधाकरः स भगवानस्तु प्रसन्नः सताम् ॥

सर्वे (सकरास्फोटनम्) बाढं बाढम् ! धन्यो महाराजः ।

राजा (इति भगवत्प्रतिमां प्रणम्य स्वासनादुत्थाय) गच्छामस्तावतअद्यैतावदेव (इति बहिर्निष्क्रमति तमनु सर्वेऽपिगच्छन्ति

पटाक्षेपः

इति सप्तमदृश्यम्

अष्टमदृश्यम्

[मल्लवंशीयनृपमणिमणिरसौ राजा सिद्धिनरसिंहमल्लः अस्य शासनकालो वि. सं. १६७५–१७७५यावत् ।]

[दृश्यमिदं तत्रत्यशिलाफलकादृगृहीतम्]

ततो दृश्यते ललितपुरराजभवनपश्चिमदिशि विराजमानं सुविशालं नवनिर्मितं प्रायः समाप्तकृत्यमेकविंशतिसुवर्णकलशैरुपशोभितं विद्योतमानशिखरं परब्रह्मणो भगवतः श्रीकृष्णस्य प्रतिमासनाथमनुपमनैपुण्यनिर्मितं संदृश्यमाभिनत्ति चित्राङ्कितभगवद्बाललीलं सुशोभनं मन्दिरम् । तदग्रे विभ्रमद्वैदिकब्राह्मणवृंदं सम्भृतसम्भारं संसाध्यमानकोटिहवनक्रियं सुविस्तृतं यज्ञमण्डपञ्च । तदस्मिन् सत्कर्मणि नियुक्ता राज पुरुषाश्चेतस्ततो भ्रमन्त आहरन्तश्च विविधयज्ञीयसाधनानि दृश्यन्ते यज्ञमण्डपेऽस्मिन् ब्राह्मणानां प्रचलतीत्थंरूपेण ।)

एकोविद्वान् भो विद्वत्प्रवराः! अत्रत्योऽस्मत्क्रियाकलापस्तु समाप्तप्राय एवाऽभूत् । तदत्र केवलं महाराजागमनमेवाकाङ्क्षयतेऽस्म - स्माभिः किं न वा?

अन्यो..... नास्ति तदन्यत् । कपिलाधृतमधुद्राक्षादि-
मिश्रिताः सतिलयवाक्षताः सुयोग्याभिः
समिद्भिः सहैव पर्याप्ताः अन्यत्सर्वं
वस्तुजातं प्रपूर्णमेव । इत्थं भगवत्प्री-
त्यर्थं समुपाहृता सज्जीकृतेयं होमसाम
ग्र्यपि परिपूर्णैव ।

(तदैव नेपथ्ये,) " यज्ञमण्डपमभ्या-
गच्छति महद्यज्ञः राजाधिराजः श्रीसि-
द्धिनरसिंहमल्लदेव उद्धर्ता सज्जनानां,
भर्ता स्वपुत्रतुल्यानां प्रजाजनानां, सत्कर्ता
च भगवद्भक्तानाम् ,, इत्युद्घोषितं श्रूयते ।)

(ततः प्रविशति तथासंस्तुतो राजा सिद्धिनरसिंहः)

राजा – (स्वपरिकरैः समं मण्डपपश्चिमद्वारमाश्रित्य साञ्ज-
लिबन्धं किञ्चित्प्रणतशिरा वैदिकब्राह्मणवर्गानुद्दिश्य)
आदिशन्तु विद्वत्प्रवरा मदीयकृत्यम् ।

श्रीनाथः–(भाव्याचार्यः) (सोल्लासम् वर्धतां !)
महाराजः (,,ततो यज्ञीया ब्राह्मणाः सुस्वरं सलयं
मङ्गलाशंसनपराश्चतुर्वेदानुगता ऋचः पठन्ति ।
तदनन्तरं राजानं समुचिते कुशास्तरणे संस्थाप्य-
सर्वप्रथमं प्रायश्चित्तनैमित्तिकां कपिलां गां भाव्या-

चार्याय श्रीनाथशर्मणे ब्राह्मणाय दापयित्वा यज्ञप्रधा-
नाङ्गभूतां गणेशदीपकलशार्चनपूर्विकां सत्क्रियां-
सम्पाद्य ब्राह्मणवरणं कारयन्ति । ततोयजमानो
राजा सतिलकुशजलहस्तः स्वमुखेनैव देशकालौ सं-
कीर्त्य ..... सिद्धिनरसिंहवर्माऽहं परब्रह्मणो-
भगवतः श्रीकृष्णस्याऽनन्तकालं यावत् स्ववहृत्प्रेमप्रा-
प्त्यर्थमेभिः सम्भृतसम्भारैर्णायकीमन्त्रैः कोटिसङ्ख्याक
सद्धविहवनं ब्राह्मणद्वारा कारयिष्ये । तदर्थमेभिर्यथालब्ध
साधनैरिमान् ब्राह्मणान् आचार्यब्रह्मागणपति होतृ
निरीक्षकजापकपरिचारकादिरूपेषु वृणे " इति
सकल्प्य तदनुरूपकार्यं स्वहस्तादेव सम्पादयति स-
र्वेभ्यो यथायोग्यं ददाति च तत्तद्वस्तूनि ।)

(ततो यज्ञः सुचारुरूपेण बहुदिनानि या-
वत् प्रचलति । यत्समासौ तदङ्गभूतसर्वकर्मादिक-
मपि यजमानरूपेण स्वयमेवाचरता राज्ञा नेपथ्यत-
उद्गातावश्राव्य निम्नाङ्कितौ श्लोकौ सर्वैर्यज्ञीयजनैः
साकम् ।

कदाचिदेतेन महोन्नतेन
मठः कृतः कोऽपि धनैरनेकैः ।
श्रीबालगोपालविलासभूमि-
र्वैकुण्ठतामेति धरा-जगत्याम् ॥

यो मेरुमन्दरमहेन्द्रहिमाद्रिविन्ध्य-
कैलासशैलशिखरभ्रममातनोति ।
किञ्चाऽस्य हेमकलशानवलोक्य देवैः
सन्दिह्यते कनकधामनि पर्वतेन्द्रे ॥

(ततो राजाऽऽचार्यप्रमुखैर्ब्राह्मणवर्गैराजपुरुषैश्च समं भगवतः श्रीकृष्णस्य नवनिर्मितमन्दिरस्य प्रतिष्ठां विधातुं तत्रत्यां भगवन्मूर्तिं जोद्घाटयितुं तदभिमुखं गच्छति । तत्र राजोपचारैः सुसम्पन्नां पूजां विधाय पुष्पाञ्जलिं गृहीत्वाऽवस्तनं पद्यमेकं समुच्चार्य-

ध्यानाभ्यासवशीकृतेन मनसा तन्निर्गुणंनिष्क्रियं
ज्योतिः किञ्चन योगिनो हृदिपरं ध्यायन्ति ध्यायन्तुते ।
अस्माकन्तु तदेव लोचनचमत्कारायभूयाच्चिरं
कालिन्दी-पुलिनोदरे किमपि यन्नीलं महो धावति॥

परब्रह्मणो भगवतः श्रीकृष्णस्य पदाब्जयोः समर्पयति तावदेव पुनर्नेपथ्येऽवस्तनः श्लोको विगीतः श्रूयते-

हर्षान्नेपालवर्षे स्वरशरतुरगैरङ्किते फाल्गुनीये
पक्षेप्राप्ते बलक्षेऽमरगुरुदिवसे शङ्करर्क्षे दशम्याम् ।
चक्रे जाम्बूनदीयैर्गुरुतरकलशैर्भास्वरैरेकविंशे-
नेपालक्षोणिपालः प्रथित भुजबलो भूवर्णतन्मठस्य ॥

(ततः परिकरैः समं राजा विहिनिःसरति)

पटाक्षेपः

इत्यष्टमदृश्यम्

नवमदृश्यम्

(सुविख्यातनामा बहुविधभाषाविदयं कवीन्द्र इति-सुपदवीभाक् प्रतापमल्लो राजाधिराजः) अस्य शासनकालो वि. सं १६९८-१७३१ यावत् ।

दृश्यमिदं हनूमदङ्कितप्राचीनराजभवनात् काष्ठमण्डपनगरमध्यस्थात् तदन्यात् स्वयम्भू-अनन्तपुरस्थात्तथैव पशुपतिमन्दिरशान्तिपुरस्थाच्चेतत्तदभिलेखाद् गृहीतम् ।)

(ततो विदृश्यते सुप्रसिद्धमुपर्युक्तराजभवनम् यत्सभायां संस्थिताः सन्ति बहवो विद्वांसः । ये नाम तदानीन्तने समये बहुविधभाषाविदस्तन्त्रेषु मन्त्रेषु च लब्धप्रतिष्ठाः संस्कृतसंस्कृतिरक्षणादिषु सर्वथा हुतात्मान एवासन् । त एव परस्परं संभाषमाणा दृश्यन्ते ।]

एकोबुधः — भो भो पूज्या विद्वांसः किमेतत् ? कथमेतत्? सुगृहीत नामधेयेन कवीन्द्रेण राज्ञा प्रतापमल्लेन कारितेऽपिदुर्भिक्षाना-वृष्टिर्वा वारणैर्मिलिते सद्यज्ञे किमर्थं वृष्टिर्नैवजाता ? किमर्थञ्च दंभोऽपि क्रुद्धोऽस्मान् प्रतीतिमहान् विस्मयोऽस्माकं कृते वर्धतेऽराम् ? ।

अन्योबुधः — भद्रं भद्रत्कथितम् । अभ्रष्टाः सर्वेऽप्यस्मदाढ्यः प्रजागणा अनावृष्टिजन्यसं-

कष्टानुभवैर्भृशं पीड़िताः स्मः । न च जानीमहेऽतः परं समयोचितं स्वकृत्यमपि । विफला एव सञ्जाता अस्माकं ते मन्त्रतन्त्रप्रयोगा अपि

(तावदेव नेपथ्ये श्रूयते)

नानागुणाधारधामाधिपधामघोरसङ्गरदुर्धरद्विपवयूथपतिपादोद्धूतधूमाकारधूलिधूसरितदिक्खण्डलाताड्यमानकोटिकोटिदुन्दुभिदोदोङ्कोरप्रलयगजंद्धाराधरध्वानध्वनितदिक्खण्डलाखण्डलनिजयशष्खण्डीकृतश्रीकण्ठहर्म्यचन्द्रमण्डलरिपुमुण्डमण्डलखण्डनप्रचण्डकाण्डमण्डितकोदण्डालङ्कृतकृतभुजदण्डदानसन्तानसन्दानितगुणिगणगीयमानानवद्यगद्यपद्यादिविविधकाव्यकरणचातुरीधुरीणसततकृतमीमांसान्यायपातञ्जलवेदान्तवैशेषिकव्याकरणकाव्यकोषालङ्कारादिसकलशास्त्रानुसारेण सुगतमत विनोदितान्तष्करणशितिकण्ठभालनयनसमुत्थबालवह्निभष्मीभूतस्मरणानुत्सुककरणसुन्दर श्रीश्रीश्रीपशुपतिपादपाथेजपरागराशि -

तश्रीमन्मानेश्वरीष्टदेवतावरलब्धप्रसाद -
देदीप्यमानरघुकुलतिलकहनूमद्ध्वज-
नेपालेश्वरमहाराजाधिराजभूपकेसरी-
श्रीश्रीकविन्द्रजयप्रतापमल्लदेवः समा -
गच्छति ।

(ततः प्रविशति तथा प्रशंसितो राजा प्रतापमल्लः स्वैः परिकरैः समम् । सर्वे सभासदः स्वासना-दुत्थाय समकालमेवा ऽभिवादमंतमर्पयन्ति)

विजयतां विजयतां महाराजाधिराज इति ।

राजा– (किञ्चिच्छिरोनमनपूर्वकम्) अभिवाद्यन्ते विद्वदग्रगण्या अत्रत्याः सर्वेऽपि श्रीमतां तत्रभवतां चरणधूलिग्रहणैकशरणैरस्माभिः ।

(सर्वेऽपि सभासदो विजयो भवतु भवतां महाराजाधिराजानामिति सश्रद्धं व्यग्रहरन्ति)

विविदिषुरस्मि । तत् पृच्छामि का वार्तेति ?

एको विद्वान्–(साञ्जलिबन्धम्) वार्ता राजाधिराज ! सर्वेऽपि प्रजाजनाः विशेषतो ऽनावृष्ट्या-दुर्भिक्षवृद्ध्या च ।

राजा (दुःखोच्छ्वासं त्यजन्) एतदर्थन्तु संप्राप्तभ-
वत्साहाय्येन मया बहुविधाः सद्यज्ञाः
सम्पादितास्तथापि किमर्थं वृष्टिर्नजा-
यते ? किमर्थं वा देवो नाऽभिवर्षति ?
महत्खेदकरोऽयं विषयः । किमत्रकृत्य-
मस्माभिः ?

विदूषकः (दुःखं प्रकटयन्) न वयं तन्निरसनोपायं
च सम्यगवगच्छामः ।

(तावदेव नेपथ्यतो ऽनावृष्टिजन्यदुःखसमुत्थः
प्रजाभिः कृतो हाहाकारः श्रूयते । श्रुत्वैवा ऽमुं-
पार्श्वस्थं परिचरं सम्बोध्य)

राजा भद्र ! गच्छ बहिस्तावत् । किमर्थोऽयं-
कोलाहल इत्यवधार्य्य शीघ्रमागच्छ ।

भद्रः (हस्तौबद्ध्वा)यदाज्ञापयति महाराज !(इति बहिर्नि-
सृत्य पुनः प्रविश्य साञ्जलिबन्धं विज्ञापयति)
राजाधिराज ? अनावृष्ट्युपहता
वयं शरण्यमेकमेव महाराजं
ब्रूममहेत्रा यताभस्मान् दुर्भिक्षाद -
स्मादिकथयन्ति प्रजाजनाः । (इति विरमति)

राजा (सोद्वेगम्) धिक् कष्टम् ! एतादृशिप्रजा -
दुःखनिवारणार्थं बद्धपरिकरे मयि राज-

निविद्यमानेऽपि प्रजारेतादृश दुर्भिक्षमभितो जगद्बाधते? इत्ययमेव महद्दुःखस्य विषयः।

विदूषक : (सोल्लासम्) माभूर्विक्लिद्यमानमनाः प्रियवयस्य ! सञ्जातः सञ्जातोऽस्माकं भाग्योदयः । यन् मन्मानसे स्फुरितोऽयं विचारः । तदत्र सर्वैः सभ्यवरैः श्रोतव्यं यदहं ब्रवीमि । सभ्याः ? शान्तिपुरस्थगुहाभवने विशेषतोऽन्धकारमय्यां सुदीर्घायां भूमौ संभूयतेऽस्माभिः सर्वैरपि चास्मद्देशीयैः पुरातनैस्तान्त्रिकमान्त्रिकैर्विद्वद्भिः स्वमन्त्रशक्त्या कद्रुसुतान् नागान् समाहूय मुग्धानुन्नामितफणान् विधाय च तान् सूच्यग्रभागेन चच्छिरोभ्यः शोणितधारा निष्कास्य लिखितानि नवपुस्तकानि तत्रैवाऽधुना यावत् सन्तीति । तेष्वेव दुर्भिक्षानावृष्टिनिवारणोपायास्तदर्थयज्ञसम्पादनविधयश्च सुस्पष्टं लिखिताविद्यन्ते । तदस्मिन् विषये ऽधुनैव विहितनिर्णयैर्भव्यमस्माभिरिति मदीयोविचारः ।

राजा (सभ्यान् प्रत्युन्मुखीभूय) श्रुतं भवद्भिरस्मन्मित्रस्य कथनम् ? किमेतत्

सत्यं ? यदि तथ्यं मन्यन्ते तत्रभवन्त श्चेदग्र आगच्छन्तु साधका मान्त्रिकास्तान्त्रिका विद्वत्प्रवरा । मन्त्रयन्तु चान्योन्यं विचार्य्य यद्युक्तं भवेत् तत्सत् कार्यकरणायादिशन्तु मह्यम् ।

(ततो राज्ञ आज्ञानुसारं तथा प्रस्तुताः सुप्रसिद्ध विद्वांसोग्र आगत्य किञ्चित्क्षणं परस्परं सम्मन्त्र्य राजानं सहर्षं विज्ञापयन्ति ।)

विद्वांसः— (सर्वे एकमुखेनैव) सत्यं महाराजाधिराज ! तच्छ्रूयताम् मखनवहालस्थानगुभाजूप्रभृतीन् स्वयम्भूसमीपस्थान् "बांडा" इत्युपनामधारिणस्तान्त्रिकान् साकं नीत्वा भवान् प्रविशतु तावत्तस्यां गुहायाम् । ततस्तत्पुस्तकमादाय सर्वप्रथममत्रागन्तव्यं तत्रभवता महाराजेन । तदन्तरमेव दृष्ट्वा च तत् तत्र लिखितं यथा सर्वं कार्यजातं यथाविधि करिष्यामोवयम् ।

राजा— प्रजाहितार्थमवश्यमेवाऽहं तथाकरिष्यामीति मे मतिः योऽहम् (सोल्लासमवस्तनंपद्यमेकं सलयं गायति)

शस्त्रे शास्त्रवरे सदा सुचकरे सङ्गीतविद्यावरे
सानन्दं किल केलिकर्मकुशलव्यापारकण्ठीरवः ।
स्वर्गेभूमितले तथा दशदिशां प्रान्ते गिरौ कानने
कोऽप्यस्तीति निगद्यते मम समो राजेन्द्रचूडामणिः॥

तद् गच्छामस्तावदधुना कार्य-
सिद्ध्यर्थम् । (इति राजा शान्तिपुरमभिगच्छ-
ति । सर्वेऽनुगच्छन्ति ।)

(ततो नेपथ्ये गीयमानानि पद्यानीमानि श्रूयन्ते)

वृष्टिनि वृष्टिमवेक्ष्य सुयुक्तं
साधकगणमाहूय मयोक्तम् ,
शान्तिपुरात् कुरु साधक !
यत्नं झटिति समानय पुस्तकरत्नम्
तेन तथैव कृतं कलिदोषात्
पुस्तकमन्यमभूत् किल मोहात्
पश्य पुनः स्वयमेव ग्रहीतुं
तत्रमनो विदधे खलु गन्तुम् ॥
नेपाले समस्तेऽस्मिन्
वसुहयमुनिभः संयुते कृष्णपक्षे
चाषाढेवै चतुर्थ्यां
शतभिषसहिते शोभने योगराजे ।

वारे वाचामवीशो

फणिरुधिरकृतं चित्रकं श्रीकवीन्द्रं

दृष्ट्वा ऽ नावृष्टिमुग्रामकृतबहिरहो !

शान्तिपूराभिधानात् ॥

तस्मिन् काले सुकाले

सकलजनमनोल्लासिनी वारिपूर्णा

जाता वृष्टिः समन्ताद्धिमवतरवरे

भूतले सारभूता ।

कृत्वातत्कर्मचोग्रं

विविधविधहितं स्वप्रजारक्षणार्थं

राजेन्द्रः श्रीप्रतापो बुधजनसहितः

प्राभिभिर्मोदमाप ॥

(इति सुप्रसिद्धकर्मणा ऽनेन राज्ञा तत्सुभिक्षप्रभावात् सुवर्णतुलादानं कृत्वा तत्स्मृत्यर्थं भगवतः पशुपतेर्मन्दिरस्य दक्षिणद्वाराग्रभागे द्वौ शिलास्तम्भौ कृष्णतरौ समुच्चौ स्निग्धौ च संस्थापितौ दृश्येतेऽ द्युतायामपि ।)

पटाक्षेपः

इति नवमदृश्यम् ।

दशमदृश्यम्

मल्लनरेशोऽयमपि श्रीभूपालेन्द्रमल्लः । अस्य शासनकालो वि. सं १७४४–१७५४ यावद् दृश्यते । दृश्यमिदं भाजुदेवलाभिधेयात्तन्निर्मितमन्दिराद् गृहीतम् । तल्लेखाधारितश्च ।

(ततः प्रविशति वृद्धब्राह्मणरूपः कञ्चुकी स्वदक्षिणहस्तेन यष्टिमवलम्ब्य)

कञ्चुकी– (किञ्चिदग्रे गत्वासम्यानवलोक्य)

हाधिक् ! जीवनं प्रायशः सर्वमपि मया स्वपरिजनोदरपरिपूरणार्थव्यर्थीकृतम् । को वा नाम मूढतमो भवेदन्यो मादृशः ? आत्मघाती च । किं तवात्मतत्त्वम् ? का वा आध्यात्मविद्या ? कथं वा सा विज्ञायते ? इति तु मया कदापि नैव विचारितम् । का वा गतिर्भवेदन्ते । मादृशस्य मनुष्यहतकस्य ? अथवा यद्वातद्वा भवेत् , कोऽत्र विचारो ऽ धुनैवा ऽ ज्ञाततत्वा यामस्यामध्यात्मविद्यायाम् । सत्यमाह नाटकस्यास्यलेखकः कविःस्य निर्मिते नाचिकेतसामित्राने सं कृतमहाका व्यस्यऽष्टमसर्गे

(सुस्पष्टं तत्रत्यं श्लोकममुं गायति)

श्रुत्वाप्येनां तेषु केचित् कथञ्चित्
भोगैस्तैर्तैर्दूषिता हन्त ! चित्ते ।
तां विन्यस्तुं ज्ञातुमस्याः रहस्यं
नैते तुच्छाः शक्नुवन्तीह तस्मात् ॥
आस्तां तावत्प्रकृतमनुसरामि । भो-
भो सभ्यवरा विद्वत्प्रवराः श्रूयन्ताम्! अ-
धुनाऽयं वसद्गुणाजितामित्रो वि श्वामि-
त्रोराजा भूपालेन्द्रमल्लः समायाति स्वनि-
र्मितमन्दिर स्थभगवद्दर्शनार्थम् ।

(तदैव प्रविशन् दृश्यते तथासंस्तुतो राजायुवरा-
जेनमाष्करमल्लेन समं गात्रसंरक्षिभि रनुचरैरनुगम्य-
मानः)

राजा (भगवतो मन्दिराग्रभागमाश्रित्यसाञ्जलिवन्धं सुप्र-
सिद्धं प्राक्तनमहाकविरचितं श्लोकममुं-

मन्दारमालाकुलितालकायै
कपालमालाङ्कितशेखराय ।
दिव्याम्बरायै च दिगम्बराय ।
नमः शिवायै च नमः शिवाय ॥

समुच्चार्य सभक्तिं नमस्कारान् समर्पयति । (युवरा-
जमवलोक्य) किं भो युवराज ! काचिज्जिज्ञासा-
वर्तते ?

युवराजः— (स्वशिरोममन्) तातपाद ! भगवतो भवानीपतेः पूजाक्रमं विविदिषुरस्मि । तमेवतावदुपदिशन्तु पूज्यपादाः ।

राजा— (सस्नेहम्) तदवहितोभव

युक्तं शुद्धासनमधिवसन् भूतशुद्धिनिजाङ्गे
कुर्वन् प्राणानपि विमलधीः स्थापयन् हृत्सरोजे ।
देवंध्यात्वा त्रिभुवपति चित्तजातोपचारै-
रभ्यर्च्यं तं बहिरपि तथा पूजयेद् भक्तिभावात् ।।

तदागच्छ । गच्छामस्तावत् ।(इति तत्स्कन्धे भुजं संस्थाप्य मन्दिराद्बहिर्निः सरति ।)

पटाक्षेपः

इति दशमदृश्यम्

एकादशदृश्यम्

(मल्लनरेशोऽयं भूपतीन्द्रः । अस्य शासनकालो वि. सं. १७५३ – १७७९ यावत् । अनेनैव राज्ञा विनिर्मितं पञ्चपञ्चाशद्गवाक्षपरिपूर्णं राजभवनं भक्तपुरनगरमध्यमधुना यावद् विद्योततेतराम् ।)

ततः प्रविशति स्वमहिष्यादिभिः परिवृतो राजा भूपतीन्द्र मल्लो भगवतो नृत्येश्वरस्य दर्शनार्थं तत्रत्यसुशोभनमन्दिरे ।

राजा– देवि ! पश्य तावद्भगवतो नृत्येश्वरस्य प्रोज्ज्वलत्स्वरूपम् । स्वभक्तानुकम्प्यसौ भगवान् विशेषतोऽस्मासु कृपां करोति । तत् प्रणम । यावदहं श्लोकममुं समुच्चार्य प्रणमामि जगदीश्वरम् ।

(इति साञ्जलिबन्धं सुस्पष्टं सलयं स्तुवन् गायति ।)

रङ्गत्प्राङ्गण चण्डताण्डवपटुः
प्रत्यूहसंघं मुहु–
र्निघ्नन् विश्वहिते रतोगिरिसुता
देहार्द्धभाक् सर्वदः ।

भूपतीन्द्रशल्लः

ताराधीश्वरखण्डभव्यतिलकः

कर्पूरकुन्दप्रभः

स्फूर्जत्पन्नगहारकङ्कणकरो

नृत्येश्वरः पातु वः ॥

(इति महाराजोपचारैः सभक्ति पूजां विधाय भगवतो मन्दिराद्बहिर्निःसरति । सर्वेऽपि क्रमं निर्गच्छन्ति ।)

पटाक्षेपः

इत्येकादशदृश्यम् ।

द्वादशदृश्यम्

अथापि मल्लनरेन्द्रालङ्कारभूतो रणजिन्मल्लः । अस्य राज्यशासनकालो वि. सं. १७७९–१८२६ यावद् दृश्यते ।

(दृश्यमिदं तद्रचितजलशायिविष्ण्वादि सृष्टयुपाख्यानग्रन्थतोऽवगन्तव्यम् ।)

(ततः प्रविशति राजा रणजिन्मल्लः स्वकुलपुरोहितादिभिः सार्धम् । पुरो दृश्यते भगवतः शूलपाणेर्मन्दिरं तदन्तर्विराजमानं भगवत्स्वरूपञ्च)

पुरोहितः– (सस्मितम्) धन्यो महाराजः । यन्मन्त्रया स्वप्रजाननमनोनुरागिण्या रीत्या च सनातनधर्मपरिपालनसदर्थनानुगतया सर्वेऽपि विषयरक्षया भृशमाह्लादिताः ।

राजा– (सविनयम्) अन्यथा चिन्तितं विषयेऽस्मिन् मदीयाभिप्रेऽमुकेऽमुके विषयकलापे व्यवहारेऽपि तदन्यतम इत्थमित्थं करोमीति तदनुरूपं कर्तुं नाहं समर्थः प्रभवं तावदनेकैः कार्यातिपातैरभिस्थितैर्विघ्नैश्च निरन्तरमाहन्यमानः सन्नीतिमन्मनाः सञ्जातोऽस्मि । पुरोहितप्रवर ! तदनभ-

वद्भिरपि विचारणीयं यद्भवन्तस्तु विशेषेणाऽस्माकं पुरोहितकर्तार एव ।

पुरोहितः– महाराज ! यथाबुद्धि सुविचार्य विज्ञापयिष्यामि ।

(इत्युभौ तत्रैवेतस्ततो भ्रमन्तौ भगवन्मन्दिरसमीपमागच्छतः । यत्र राजा स्वमुखेनैव स्वरचितजलशायिविष्ण्वादिसृष्ट्युपाख्याननामकग्रन्थस्थमेकमात्रं पद्यमिदं सलयं सुस्वरं पठति ।)

सानन्दं चन्द्रमौलिः सुरनिवहनुतश्चन्द्रखण्डावतंसो
हिण्डीरस्तोमगौरो रविशशिहुतभुग्लोचनो विश्ववन्द्यः ।

त्रैलोक्यत्राणदक्षः सुरनगरसरिन्मौलिदेशे दधानः
पार्वत्याऽऽश्लिष्टदेहः फणिपतिवलयः पातु वःशूलपाणिः ॥

(ततः शनैः शनैर्मन्दिराद्बहिर्निःसरति)

पटाक्षेपः

इति द्वादशदृश्यम्

त्रयोदशदृश्यम्

प्रस्तूयमानोऽसौ राजा प्रबोधचन्द्रोदयनाटकारो-मल्लभवंशावतंसो जगज्जयमल्लदेवः, अस्य शासनकालो वि. सं. १७७९-१७९० यावत्।

(दृश्यमिदं तन्निर्मितनाटकत एव गृहीतम्। नाटकस्याऽस्य केवलं सूत्रधारोक्तिरेव दर्शिता वर्तते।)

(ततः प्रविशति सूत्रधारः)

सूत्रधारः - आज्ञप्तोऽस्मि महाराजेन जम्बूद्वीपाधिष्ठितसकलराजचक्रचूडामणिमञ्जरीविराजितचरणकमलेनाऽगणितगुणगणगरिमगम्भीरमहिमरत्नाकरनिरवधिवितन्यमानवितरणसन्तानजनितयशःस्तोमसोमेनाऽनेकविबुधसंगशास्त्राम्बुधिमन्थनोपार्जितज्ञानचन्द्रेणपुरहरमुरहरहररमणीचरणपरिशीलनैकचित्तेन तरणिकुलजलधिकौस्तुभायमानहनुमद्ध्वजेन श्री श्री श्री श्रीयुतजगज्जयमल्लभट्टारकेन निखिलसुरासुरमुकुटमणिमञ्जरीविराजितचरणपङ्कजस्य सुरणदीसंशोभितपिङ्गजटाभास्वरस्य श्री श्री श्री पशुपति भट्टार

कस्य यात्राप्रसङ्गेन विगन्तवासिनो विबु-
धास्तपस्विनोवेदान्तिनश्च समागताः ।
इदानीं वयमपि कृतकृत्याः । यतः -
हत्वा बलेन समरे परिपन्थिवर्गं
यज्ञं विधाय विविधं परिपूजनञ्च ।
प्राप्तोऽस्मि शैलशिखरे सुखदं सुराज्यं
नातः परं किमपि मे करणीयमस्ति ॥
तदस्मत्कृतमभिनयं प्रबोधचन्द्रोदयनाम-
नाटकमभिनेतव्यं भवद्भिरिति ।

(इतिमात्रं संसूच्य बहिर्निः सरति ।)

पटाक्षेपः

इति त्रयोदशदृश्यम्

चतुर्दशदृश्यम्

शाहवंशीयानां वर्तमाननेपालनरेन्द्राणां प्रतिष्ठापको दृढस्तम्भरूपोऽयं गृहीतनामा पृथ्वीनारायणशाहवर्मा विशेषतो विभिन्नराज्येषु विभक्तावस्थस्य तात्कालिकनेपालस्यास्यैकीकरणे संप्रदत्तमनोवर्ष्मा पवित्र कर्मा च दरीदृश्यते । अस्य शासनकालो वि. सं. १७९९-१८३१ यावत् ।

(दृश्यमिदं तन्निर्मित " ब्रतरत्नमाले " ति ग्रन्थादुद्धृतम्) ततो दृश्यते चतुर्दशशास्त्रनिष्णातं विद्वद्वृन्दं पुरतः शोभमानम् । तथैव परस्परं कृतानेकवार्ताः विद्वांसश्च दृश्यन्ते

एकोविद्वान्- भो भो विद्वद्वराः ! पृथिव्यां नारायणसमेन राज्ञा पृथ्वीनारायणेन वयमद्याऽत्र किमर्थमाकारिता इति न जानीमः ।

अन्योबुधः- यस्य कस्यापि विषयस्य निर्णयार्थमेव भवेदिति तु तर्कयाम एव । अस्माकन्तु कार्यमेवैतत् ।

(तावदेव नेपथ्यतः श्रूयन्ते चेमानि वाक्यकदम्बानि प्रस्तुतोऽयं पृथ्वीनारायण इव पृथ्वीनारायणो राजाधिराजः स्वपुत्रेण युवराजप्रतापसिंहेन सहैवेत एवागच्छति । तद्भवद्भिः सभ्यवरैः संप्रदत्ता-

वधानैर्भव्यम् ।]

ततः प्रविशति तथासंस्तुतो महाराजाधिराजः पृथ्वीनारायणः समं युवराजेन , स्वप्रधानकाजीति पदभाजा वंशराजेनपाण्डेयेन च ।

सभासदः— (स्वासनेभ्यः समुत्थाय) विजयतां शाहवंशावतंसो महाराजाधिराजः ।

पृथ्वीनरायणः(भूमावेव सुसज्जितं सिंहासनकल्पं शुभास्तरणमलङ्कुर्वन्) उपविशन्तु सर्वे विद्वांसो भवन्तः । धन्योऽहम् ! यद्भवद्भिरित्थं शुभाशीर्वादो दीयते [युवराजमपि स्वनिकटसंस्थापितासने स्वसम्मुखीकृत्य स्थापयन्) तद् विनिवेदयामि विद्वद्वृन्दं मया शिवरात्रितिथिनिर्णय इत्थं क्रियत स्म । तदत्र श्रीमतां विद्वत्प्रवराणां को वा विचारः ! मदीयो निर्णयो वा कीदृशः समजनि ? प्राक्तनानां विद्वद्वराणां विषयेऽस्मिन् को वा विचारः ? शुद्धतमः शास्त्रीयश्च ! तं स्वकृतनिर्णयरूपं भवतां पुरः स्थापयामि पुत्रममुं [हस्तेन युवराजं निर्दिश्य] शिश्यकल्पं

विभाव्यैतस्य ज्ञानलाभायैवोपदेश रूपेण वच्मि विचाराविरुद्धे भवद्भिरप्यत्र स्व - स्वीकृतिर्देया। नो चेत् तत्सत्त्वरूपं यथा-शास्त्रं विविच्य तथ्यं निर्देशनीयम् । शिक्षयितव्यश्चासौजनः ।

सभासदः- कथयन्तु राजाधिराजाः सर्वप्रथमं शृणु मस्तावत् ।

(तदैव नेपथ्ये गीयमानो ऽ घस्तनः श्लोको-विश्रूयते)

जित्वा बलेन करदीकृतसर्वराजः
सिंहासनोपरिनिविश्य विराजमानः ।
आसीनमन्ति पुरतो ऽ वनिपालपृथ्वी-
नारायणः सुतमुवाच हिताय वाचः ॥

(ततो राजाधिराजः स्वपुत्रं युवराजमुद्दिश्य सुस्पष्टं व्याहरति सभ्यानामभिमुखीभूयाधः स्तनान्-श्लोकनिवहान् -

कृष्णे सती तपसिमासि चतुर्दशी तु
व्याप्ता निशीथमुभयत्र तु सा सपूर्वा ।
नो चेद्द्वयोरपि तदा तु भवेत् परैव

मुख्यो निशीथसमयः शिवपूजनादौ ॥
स्याच्चेत्प्रदोष समये दिवसद्वयेऽपि
पूर्वैव नैव यदि वैकदिने ऽपिवा स्यात् ।
भौमेऽथवा शशिनि वार्कदिनेऽपि वा स्याद्
योगे शिवे सुत ! यदीयमतिप्रशस्ता ॥
नित्यापि सम्भवति वत्स ! मते मुनीनां
काम्याऽपि सा शिवनिशार्चयितुर्जनस्य ।
संपूज्य गन्धकुसुमाक्षतविल्वपत्रै-
र्भक्त्या शिवं सुतोषसि पारणीयम् ॥
कृष्णाखिलार्चन विधौ वृषवाहनस्य
ताव द्भवेदितर कर्मणि सा सपूर्वा ।
शुक्ला परा सुत ! कदापि न माक्षिकस्या-
स्वादो नृणां हितकरो हि चतुर्दशीषु ॥
(सभ्यानवलोक्य निर्णयोऽयं मदीयः कोवा
श्रीमतां विद्वद्धौरेयाणाम् ? भवद्भिः किं
वा ऽभिधीयते विषये ऽस्मिन् ? निः
शङ्कं कथनीयम् ।

सभ्याः– (परस्परमभिसंमन्त्र्य समकालमेव)

श्रेष्ठतमो ऽयं भवद्विचारो राजाधिराज !
मान्यो ऽसौ निर्णयो ऽस्माकमपि ।
सुष्ठु ! सुष्ठु !!

पृथ्वीनारायणः–(कृतज्ञताप्रदर्शनमुद्रामभिनीय)

तद्धन्योऽस्मि । गच्छामस्तावत् । विसर्जिता भवतु सभाचैषा ।

(इति सर्वे गच्छन्ति)

पटाक्षेपः

इति चतुर्दशदृश्यम्

अयं पूर्वप्रस्तुतपृथ्वीनारायणज्येष्ठपुत्रः संस्कृतविद्वान् शाहवंशावतंसो राजाधिराजः प्रतापसिंहशाहः। अस्य शासनकालो वि सं. १८३१- १८३४ यावत् ।

(ततो दृश्यते पुरतो विद्वन्मण्डली विराजमाना । तदग्रे च नेपालेश्वरः प्रतापसिंहः सिंहासनस्थे हस्ताब्जाभ्यां स्वरचितपुरञ्जयार्णवग्रन्थरत्नं विगृह्य सभासम्मुखं किञ्चिदभाषमाणः ।

प्रतापसिंहः विद्वांसः ! मया विनिर्मितं विशेषतः समाप्तप्रायं शास्त्राध्ययनजन्यसत्प्रयाससिद्धं ग्रन्थरत्नमिदं पुरञ्जयार्णवाभिधानामाति तु भवद्भिरवगतपूर्वमेव । तस्यैव कञ्चिदंशमात्रं श्रावयामि भवद्भ्योऽहम् । तदत्र विद्वत्प्रवरैर्विशेषेण तान्त्रिकैर्बुधैर्मान्त्रिकैश्च क्षणमात्रं संप्रदत्तावधानैर्भाव्यम् । मन्त्रदानप्रक्रियेयं गुरुशिष्ययोः प्रदानादान वैषयिकी ।

ततः शिष्यः समुत्थाय धौतवाससी परिधायाचम्य गुरोः सन्निधौ तदा -

ज्ञया पूर्वाभिमुख उत्तराभिमुखो वा आसन उपविशेत् । ततो गुरुरात्मनः सकाशात् तद्देहे संक्रान्तां देवतां विचिन्त्य तयोरैक्यं विभाव्य गन्धपुष्पादिभिः संपूज्य मन्त्रं दद्यात् । तद्यथा- अमुकदेवतामन्त्रमहं ददामीति प्रतिज्ञां श्रावयन् गुरुः शिष्य-हस्ते जलं दद्यात् । ददस्वानुग्रहपूर्वकमिति शिष्योवदेत् । ततो गुरुः शिष्यस्य शि-रसि हस्तं दत्त्वा देवमन्त्रमष्टोत्तरशतं प्रजप्य दक्षिणकर्णे त्रिवारं मन्त्रं श्रावयेत्।

स्त्रीशूद्रयोस्तु वामकर्णे मन्त्रंकथयेत् । जलदानपूर्वकमन्त्रदानं ब्राह्मणमात्रविषय-कम् । तद्वितरेभ्यस्तु तद्विनैव मन्त्रं दद्यात् । ततो गुरुर्ज्योतिर्मयीं वि-द्यां स्वतः शिष्यतनुं प्रविशन्तीं विचिन्त्य नमस्ते भगवन्नाथ ! शिवाय गुरुरूपिणे ।
सर्वदेवस्वरूपाय सर्वमन्त्रमयाय च ॥

घोरान्मृत्युमहापाशान्मोचितः कृपया त्वया ।
त्वत्प्रसाददहं नाथ! कृतकृत्योऽस्मि सर्वतः ।
इति स्तुत्वा गुरुचरणयोर्दण्डवत् पतित एव
क्षणं तिष्ठेत् । ततो गुरुः-
उत्तिष्ठ वत्स! मुक्तोऽसि सम्यगाचारवान्भव ।
कीर्तिश्रीकान्तिमेधायुर्बलारोग्यं सदाऽस्तु ते ॥
इत्युक्त्वा शिष्यमुत्थापयेत् ततः शिष्यो-
गुरुदेवमन्त्राणामैक्यं विभाव्य गुरोराज्ञया
तत्सन्निधावेवतन्मन्त्रमष्टोत्तरशतं ज-
पेत् । ततश्च वित्तशाठ्यं विहाय
सर्वस्वं तदर्धं वा गुरवे दक्षिणां दद्यात् ।
तत्र संकल्पः । कुशतिलजलान्यादाय-ॐ
अद्येत्यादि अमुकगोत्रप्रवरोऽहममुकनामा
कृतैतदमुकदेवतामन्त्रग्रहणप्रतिष्ठार्थमिमां
दक्षिणामामुकगोत्रायामुकनाम्ने श्रीगुरवे
संप्रददे । एवं ब्रह्मप्रतिनिधिविप्रायाऽन्येभ्य

ऋग्विद्भ्यश्च गोभूहिरण्यवासो ऽलङ्कारादिद्रव्याणि दद्यादित्यादि । ततः पूजोपकरणसहितं मण्डपञ्च गुरुहस्ते प्रतिपादयत् । तदत्र कथयन्तु भवन्तु कीदृशः सञ्जातः ? (इति विरमति)

सभासदः (एकमुखेनैव) समुचितोऽयं विधिः । सुष्ठु तथैव सुशोभनञ्च । धन्यो भवान् यो ऽभूतपूर्वो विद्वान् सञ्जातः शाहवंशेऽस्मिन्

प्रतापसिंहः (कृतज्ञता प्रकटयन्) भवन्तो विद्वांस एतदर्थमेव मयाकारिताः कष्टं प्रापिताश्च । तदधुना विसृज्येमां विद्वद्गोष्ठीं गच्छामस्तावत् कार्यान्तरसाधनार्थम् ।

[इति सर्वे निःसरन्ति]

पटाक्षेपः

इति पञ्चदशदृश्यम्

षोडशदृश्यम्

रणवहादुरशाहोऽयं । तदुत्तराधिकारी शाहवंशीयो नरेशः अस्यापि शासनकालो वि. सं. १८३४-१८५५ यावत्

दृश्यमिदं तन्निर्मितजालन्धरोपाख्याननामकानाटकाद्गृहीतम् । परं केवलं सूत्रधारवाक्यविन्यासमात्रमत्रलभ्य निर्देशितञ्च ।)

(ततः प्रविशति सूत्रधारः)

सूत्रधारः- देशदेशान्तरादागतानां निखिलविद्यावतां श्री ३ ज्योतिर्लिङ्गपशुपतीश्वर श्री ३ गुह्येश्वरीयात्राप्रसङ्गेन संमिलितानां रसिकवतां मनोऽनुरञ्जयता मभिनव नव रसरुचिरैः कान्तिपुराधिश श्री श्री श्रीमन्महाराजाधिराज रणवहादुर शाहकारितजालन्धरोपाख्याननाटकप्रबन्धैः ॥

इति श्रीमन्नटनायकावतारज्योतिर्लिङ्गपशुपतीश्वर नटेश्वरी श्री३गुह्यकालिकापादारविन्दमकरन्दामोदसन्दोहानन्दितान्तःकरणमिलिन्दगिरिराज चक्राधी-

श्वरनिखिलराजन्यकुलमौलिमकुटमणि-मञ्जरीसाम्राज्यमानपादपीठ कविशेषर श्रीमन्महाराजाधिराज रणवहादुर शाहदेवविरचिते जालन्धरोपाख्याननाटके षष्ठो ऽङ्कः ।

(इतिमात्रं संसूच्य वहिर्गच्छति)

पटाक्षेपः

इति षोडशदृश्यम्

सप्तदशं दृश्यम्

प्रस्तूयमानो ऽसौ नरपतिर्गीर्वाणयुद्धवीर विक्रमनामाऽपि शाहवंशमणिः संस्कृतविद्वांश्च । परन्तु दुर्भाग्यवशादत्यल्पे वयस्येव राजसिंहासनमलङ्कृत्य युवावस्थायामेव लोकान्तरं गतः । अस्य शासनकालोऽपि वि. सं. १८५५–१८७३ यावत्

(दृश्यमिदं तद्रचितसत्कर्मरत्नावलीतिनामकाद् ग्रन्थरत्नादुद्धृतम् ।)

तत्र सर्वप्रथमं दृश्यते राजसभाराजपरिकरैर्विद्वद्भिश्चान्यैः सभासद्भिः सुशोभिता । यस्या अध्यक्षपदमलङ्कुर्वाणो नृमणिगीर्वाणवीरविक्रमो दृष्टिपथमायाति

गीर्वाणोराजा (पूर्वप्रसङ्गोपात्तां शुद्धिनैमित्तिकां वार्तामनुसृत्य) सभ्या ! बाह्या शारीरिकी शुद्धिः पञ्चभिर्भूतैः पृथिव्यप्तेजोवाय्वाकाशादिभिः सञ्जायते । इत्यत्र तु न केषाञ्चिदपि मतभेदः । तत्र विशेषतो मलापहरणे सर्वोत्कृष्टस्य जलतत्त्वस्यैवावश्यकता । तदभावेऽलाभे वा क्रमशो मृत्तिकाशुद्ध्यादीनां सार्थकता दृश्यते ।

तच्छीघ्रं पवित्रकरं जलमेव दृश्यते । अस्मद्देशे यत्र कुत्राऽपिनिरन्तरं स्रवमाना ह्रस्वदीर्घाकारा नदा नद्यश्च बह्वःसन्ति । येषु यासु च स्नाने न केवलं बाह्यमपि त्वान्तरंसर्वमलादिकं विनष्टं भवतीति सनातनधर्मावलम्बिनामस्माकं सुदृढो विश्वासः । तद्वयमपि गण्डकी कौशिकी वाग्वतीत्यादिनदीनां दर्शनं तत्र तत्र स्नानसन्ध्यादिकञ्च सम्पाद्य राजधानीं प्रत्यागच्छामः । इति मदीया मतिः । को वा तत्रभवतो विचारः

सभ्याः शोभनोयं विचारो महाराजाधिराजानाम् । श्रीमन्तमनुसरामो वयम् ।

गीर्वाणोराजा तदधुनैव गच्छामः । स्नात्वैवागच्छामः ।

(राजा बहिर्निर्गच्छति । सर्वेसभ्यास्तमनुसरन्ति)

ततो दृश्यते नद्या गण्डक्याः पावनतमस्तटप्रदेशः । यत्र स्नानार्थं समायाताः श्रद्धावलो बहवो भक्ता दृश्यन्ते स्नानव्यग्राः । तेषु राजा गीर्वाणोऽपि स्नात्व निम्नाङ्कितं पद्यं पठन्नागतो दृश्यते ।

हरिगण्डसमुद्भूते सुरासुरनमस्कृते ।
अघौघशमने देवी पापं मे हर गण्डकि! ॥

[ततः कौशिक्या नद्यास्तटे स्नात्वा प्रत्यावर्तमानो राजा श्लोकममुं गायन् दृश्यते)

गाधिराजसुतेदेवि!
विश्वामित्रमुनेः स्वसः! ।
ऋचीकभार्ये सत्यार्थे
पापं मे हर कौशिकि ! ॥

(तथैव राजधानीस्थाया नद्यास्तटे स्नात्वा श्लोकमिमं पठन् राजा विद्योततेतराम् ।)

नमस्ते वाग्वती– देवि !
सर्वपापप्रणाशिनि ! ।
अद्य मे धावितं पापं
दर्शना त्तेचिरार्जितम् ॥

(ततो राजा स्वान्तःपुरं प्रविशति)

पटाक्षेपः

इति सप्तदशदृश्यम्

अष्टादशदृश्यम्

राजेन्द्रविक्रमोऽयं सुप्रसिद्धः शाहवंशीयो महाराजाधिराजः । अस्य शासनकालो वि. सं. १८७३-१९०४ यावत्

इदमिदं तन्निर्मितराजकल्पद्रुमाभिधेयात्पुस्तकादृष्टीतम् ।

(ततः प्रविशतः पूर्वपरिचितौ द्वौ पथिकौ । एक एकस्या अन्यो ऽन्यस्या दिश आगतौ । मध्ये मार्गं तयोरित्थं वार्ता प्रचलति)

प्रथमः (सस्मितम्) अहो ! महद्भाग्यं सञ्जातमस्माकं यद्भवान् मिलितः (इति नमस्करोति) कुतो वा समायाति तत्रभवान् ?

द्वितीयः (प्रतिप्रणमन्) अहं भगवतो मुक्तिनाथस्य दर्शनार्थं गत आसम् । तत एव प्रत्यागतोऽस्मि । भवान् ?

प्रथमः अहन्तु काञ्चेपलाञ्चोकस्थाया भगवत्या देव्याः काल्याःसौन्दर्य्याधारभूतं शिलामयं स्वरूपं दर्शं दर्शमतृप्त इवाऽऽगतोऽस्मि । धन्या सा स्वभक्तेष्टप्रदात्री देवी ।

तदास्ताम् । केवलं जिज्ञासयैव पृच्छामि तावत् कृपया वदन्तु मह्यं भवन्तः अत्रत्या वर्तमाननेपालनरेशाः श्री ५ वीरेन्द्रवीर विक्रम शाहाभिधाना महाराजाधिराजाः कस्मिन् वंशे समुत्पन्नाः? तेषां क्रमपूर्विका-वंशावली दृश्यते न वा ? का वा तेषां प्राक्तनी स्थितिः ? कुत्रत्याश्च ते नेपालीया भारतीया वा?

द्वितीयः बाढ़म् ! युक्तं पृष्टं भवता । तच्छ्रूयताम् ! वर्तमाननेपालनरेशानां श्री ५ वीरेन्द्रमहाराजाधिराजानां पूर्वपुरुषा भारतीया एव । भारतमध्यप्रदेशान्तर्गतचित्रकूटप्रदेशस्था आसन्निति सुस्पष्टं ज्ञायते । यद्यपि विषयेऽस्मिन् मतभेदो दृश्यते तथापि वर्तमाननेपालनरेशस्याऽस्यैव पूर्वषष्ठपुरुषः श्री ५ राजेन्द्रवीरविक्रमशाहः स्वलिखिते राजकल्पद्रुमाभिधे पुस्तके स्वयमेव स्ववंशीयान् पूर्वपुरुषान् संस्तुवन्द दंश्च परिचयमित्थं कथयति ।

खण्डिताखिलविपक्षमण्डलो
विक्रमो हिमगिरौ समागतः ।
चित्रकूटशिखरादिति काव्ये
वर्णितः कुलपुराणपण्डितैः ॥

अस्यैव विक्रम–महापुरुषस्य सुपुत्र आसीज्जिल्लराजः अस्मात् संजायत नृपोऽजितः । ततो ज्येष्ठपुत्र क्रमेणाल्लराजस्तस्माच्च तुयाराजः समजायत । अस्माद् विभिकिराजोऽभूत् । यत्सुत आसीद्हरिराजः । तत्क्रमेणैव संजातस्य श्रीब्रह्मराजस्य सुपुत्र आसीन्मन्मथभूपतिः। तस्माच्च जैनखानोऽस्मात् सूर्यखानोऽजायत । ततो मोचा खानः । अस्य च विचित्रखानः । प्रसिद्धस्यास्यैव सुपुत्रः श्रीयशोब्रह्मशाही गोर्खा प्रदेशमध्यास्य तत्रत्याः प्रजाः पालयामास । तत्सुतो द्रव्यशाही १४८१ शाके

स्वतन्त्ररूपेण गोर्खाप्रदेशस्य सुशासको बभूव । तस्य पूर्णशाहीनामकः सुतस्तदुत्तराधिकारी समजनि । अस्य राम शाही । अनेन परिपालनार्थं बह्व्यः सुव्यवस्था विहिताः । अस्य पुत्रोऽम्बरशाही तस्माच्च कृष्णशाही । ततो रुद्रशाही । अस्यैव सुपुत्र आसीत् पृथ्वीपतिशाही । एतस्य-वीरभद्रशाहीति पुत्रः समजनि अस्यैव पुत्रआसीन्नरभूपालशाही । एतस्यैव सुपुत्रो भूत्वा सञ्जात उल्लेखनीयकर्मा पृथिव्या द्वितीयो नारायण इव छिन्न-भिन्नस्वरूपाणां तत्कालीनानां विभिन्नराज्यानामेकीकर्ता शर्मण्य (जर्मन) देशस्य विस्मार्क इव पृथ्वीनारायणो बभूव । एतस्य द्वौ पुत्रौ बभूवतुः । एतेन कान्तिपुरी (काष्ठ-मण्डपम्) स्वराजधानी अक्रियत । पुत्र-योर्ज्येष्ठो राज्याधिकारी प्रतापसिंहो नर पतिरन्यो भ्राता बहादुरशाहः प्रतापसिंह-

स्यास्य सुत आसीद् रणबहादुरशाहः । एतस्माच्च संजातो गीर्वाणयुद्धविक्रमनामा सुयोग्यो नेपालेश्वरः । एतस्यैव सुत आसीदसौ प्रस्तुतो राजकल्पद्रुमग्रन्थनिर्माता राजेन्द्रवीर विक्रमशाहः । इयं वंशपरम्परादृश्यते तेषां शाहवंशीयानां नेपालेश्वराणाम् ।

प्रथमः तदास्ताम् गच्छावस्तावत् स्वस्वकार्यावलोकनार्थम् ।

(इति चोभौ निष्क्रमतः)

पटाक्षेपः

इति अष्टादशदृश्यम्

उनविंशदृश्यम्

इमे श्री ५ महाराजाधिराजास्त्रिभुवनवीर विक्रमशाहाः नेपालराष्ट्रे प्रजातन्त्रीयशासनप्रवर्तकाः संप्राप्त " राष्ट्रपिता " इति सदुपाधिधारिणो वर्तमाननेपालनरेशानां श्री ५ वीरेन्द्रवीर विक्रमशाहानां पूज्याः पितामहाः ।

(एतेषां शासनकालो वि. सं. १९६८ संवत्सरतो २०११ संवत्सरं यावद् दृश्यते ।)

(ततो दृश्येते मध्येमार्गं मिलितौ द्वौ पथिकौ)

प्रथमः अभिमुखीभूय) कुतः समायतस्तत्रभवान्

द्वितीयः (नमस्कुर्वन्) राजधानी परिसरेष्वितस्ततो भ्रमन् समागतोऽस्मि ।

प्रथमः सौभाग्येनैव लब्धं श्रीमतां दर्शनम् ।

द्वितीयः नहि नहि । नेत्थं वाच्यम् । दर्शनन्तु तेषामेव क्रियते यैर्नाम सनातनी प्राच्यसंस्कृतिः संस्कृतवाक् च सुरक्षिता परिवर्धिता लभ्यते च तत एव तद्दर्शनफलम् । त एव धन्या इति मन्मतिः ।

प्रथमः सर्वथा युक्तमभिहितंभवता । आस्तां तावत् । तादृशी काचिद् वार्ताप्यस्ति चेच्छ्रोतुमर्हा श्रावयतुभवान् ।

द्वितीयः एकावर्तते अद्यैवाऽपराह्णसमये तत्रभवान् नेपालेश्वरस्त्रिभुवनो महाराजाधिराजोऽस्मद्देशे संस्कृतवाङ्मयं प्राच्यां संस्कृतिञ्च परिवर्धयितुकामस्तदाधारभूतमेकं संस्कृत महाविद्यालयं समुद्घाटयतीति तच्छुभावसरे ऽस्माभिरपि तत्रावश्यमेवोपस्थितैर्भाव्य मिति मदीयो विचारः।

प्रथमः तद्गच्छावस्तावदावामपि ।

(इत्युभौ निष्क्रमतः)

ततः प्रविशति राजपुरुषैरन्यैश्च सभ्यैर्नागरिकैः परिसेव्यमानो नेपालनरेशः श्री ५ त्रिभुवनवीरविक्रमः रङ्गमञ्चस्थं राजसिंहासनमलङ्कुर्वन् यथास्थानं संस्थितान् सभ्यान् संबोध्य वक्ष्यमाणप्रकारं तेषां पुरः संस्थापयति स्वमेतमभिप्रायम् ।

श्री ५ त्रिभुवनः श्रद्धेयाः सभ्याः अस्माकं सार्वत्रिको विषय वस्तु गतो व्यवहारोऽनादिकालादारभ्याऽद्यावधि प्रचलन्नागतो दृश्यते संस्कृतवाङ्मयाधारित स्तदनुकूलसदाचारानुगतश्च । एतस्यैवात्संरक्षणार्थं परिवर्धनार्थञ्चास्माकं पूज्यतरराष्ट्रियराजभिर्भृशं प्रयत्नः प्रेरिताश्चेत्तदानीन्तनास्तदनुरागिण्यः प्रजाश्चापि । सत्कर्मणोऽस्यैव परिपूर्तये मयाऽपि करिष्यमाणोऽयं प्रयास आचन्द्रसूर्यं यावदुज्जृम्भतामिति मदीयोऽभिलाषः । तद् ब्रुवन्तु भवन्तो मदीयं कर्तव्यं विषयेऽस्मिन् । कथं वा किं कृत्वा वा विषयमिमं राष्ट्रव्यापकत्वेनोज्जृम्भमाणं द्रष्टुं शक्नुमः ? भविष्यति काले संस्कृतवाङ्मयस्य राष्ट्रिय संस्कृतेश्च सुमहान् प्रचारः प्रसारश्चापि तदृश एव स्यात् । तदत्रैव किं मया करणीयम् ?

एको विद्वान् (स्वासनादुत्थाय)विजयतां महाराजाधिराज स्यसर्वोच्चविचारोदयोऽयम् । नेपालाधीश्वर ! एतस्य कृते सर्वप्रथमं राष्ट्रियां लोकस्थितिं प्राच्यामपि पाश्चात्यसंस्कारानुगतां सम्यङ्निरूप्य विभाव्य च गृहे गृहे जने जने जलाधार प्रक्षिप्त तैलबिन्दुवत् परिसर्पन्तीं तत्परिहारानुरूपाः कार्यक्रमाः सञ्चालयितव्या अस्माभिरित्यहं विभावयामि ।

अन्यो विद्वान् (तत्सद्विचारमनुसरन् स्वसनादुत्थायैव)

नेपालनरेश ! बुधवरोयं भवदुक्तविषयमवलम्ब्य यत् कथितवांस्तत्सदिति विचार्य विषये ऽस्मिन् संप्रदत्तावधानैरस्माभिः स्व विषयस्थान् ब्राह्मणबालकान् संस्कृतवाङ्मयपारङ्गतान् कारयितुं सदाचारपरिपालनोन्मुखाँश्च विधातुं सर्वप्रथमं सस्कृतमहाविद्यालमेकमुद्घाट्य समयोचिता पठनपाठनप्रणालिः परिचालयितव्या यस्यां तदन्यविद्यालयपरीक्षोत्तीर्णाः संस्कृतविद्यार्थिनः क्रमशः प्रवेशं प्राप्त्वैव स्वेप्सि -

तविषयमवलम्ब्य पठिष्यन्त्येव । तत एव समये सर्वं सम्पत्स्यत इत्यस्माकं विचारः।

श्री ५ त्रिभुवनः संमीचीनः श्रीमतां विचारः । " राजकीय संस्कृतमहाविद्यालयः " इत्याख्यं महाविद्यालयमेकमहं समुद्घाटयामि । तदेतस्यकृते सुदृढ़ा व्यवस्था विधेया । तदत्राऽपि भवन्त एव प्रमाणानि ।

एकः सभ्यः धन्यो ऽस्माकं महाराजाधिराजः!

सभ्याः (एकमुखेनैव) धन्यो धन्यः (इति व्याहरन्ति)

द्वारपालः (प्रविश्य साञ्जलिबन्धम्) विजयन्तां नेपालाधीश्वराः । महाराजाधिराज! राजकीय संस्कृतमहाविद्यालयस्य समुद्घाटनावसरे वेदवेदाङ्गाध्ययननिरताः संस्कृतछात्रावासीया ब्राह्मणवटवो वयं श्रुत्वैवाद्यैव समुद्घाटयमानं तत्सन्मुहूर्ते मङ्गलोदयाशंसनपराभि र्वैदिकविधानानुगताभि र्ऋग्भिर्भगवन्तं वेदपुरुषं संस्तुत्य नेपालनरेशानामेषां सत्कर्मणोऽस्याऽऽयतिः

सुदृढा सुस्थिरा च स्यादित्यर्थमागताः स्म इति निवेदयन्ति महाराजाधिराजानां दर्शनमभिलषन्ति च समारोहेऽस्मिन्नुपस्थातुञ्च । तदत्र नेपालेश्वरा एव प्रमाणम् ।

श्री ५ त्रिभुवनः (सुप्रसन्नमुखेन) सभ्यवरा विद्वांसः ! तर्कयामि तेषामत्रागमनमेवाऽपि कार्यसाफल्य आदिकारणमिति । तच्छीघ्रं समानय तान् सर्वानपि सभामध्यम्

[द्वारपालः श्रुत्वैवाज्ञां बहिर्गत्वा तैर्ब्राह्मणवटुभिः सह पुनः प्रविश्यैकदेशे वितिष्ठते । इतो ब्राह्मणवटवो राज्ञे शुभाशीर्वादान् प्रदाय

" आ ब्रह्मन् ब्राह्मणो ,, इत्यादिकं वैदिकसूक्तं सलयं सतारस्वरं समुदीरयन्ति ।

श्री ५ त्रिभुवनस्तदैव तत्रत्यं नीलपटावृतं

" राजकीय संस्कृतमहाविद्यालयः ,,

इति त्रयोदशाक्षरनिबद्धं तत्रस्थतन्तुमाकृष्य सर्वान् सभ्यानन्यांश्च दर्शयति । ततः स्वमुखादेवाधस्तनं श्लोकं समुच्चारयति

भूयो भूयो भाविनो भूसुरेन्द्रान्
नत्वा नत्वा याचते भूप एषः ।
सामान्येयं देववाचः सुसेवा
काले काले वर्धनीया भवद्भिः ॥

(सम्यान् विलोक्य) सभासदो विद्वद्वराः ! एको ऽन्योमदीयो ऽभिलाषो ऽप्यय – मप्यधुनैव परिपूर्णो भवतु । यदस्माकं पूर्वदिशि कोश्यञ्चलस्थे धरानप्रदेशे पिण्डेश्वरनामकः संस्कृतविद्यालयो ऽधुना यावत् प्रचलन् संस्कृताध्ययनसंलग्नान् विद्यार्थिनः सुयोग्यांश्चतुर्दशविद्यानिष्णातान् कारयन् आस्ते , सो ऽपि संस्कृत-महाविद्यालये परिगतो भवतु । तत्रापि प्रचलतु तादृश्येव सुव्यवस्था यथा ऽत्र प्रचलिष्यति । तथैवा ऽस्माभिरधानीतः पश्चिमदिक्स्थितरापत्यञ्चलान्तर्गत दाङ्ग-प्रदेशेऽपि नवीनोऽन्य एको जनतामहा-विद्यालयोऽपि संस्थापितो भवतु । पठन्तु चात्रापि ब्राह्मणवटवः साङ्गां संस्कृतविद्याम् । तदधुना गच्छामस्तावत् कार्यान्त-रसम्पादनार्थम् । (इति महाराजाधिराजो – बहिर्निर्गच्छति सर्वे तमनुगच्छन्ति ।)

पटाक्षेपः

इति उनविंशदृश्यम्

विंशदृश्यम्

(श्री ५ महाराजाधिराजो महेन्द्रवीर विक्रमनामाऽयम् अस्य शासनकालो वि.सं. २०११ तः २०२८ यावत् ।)

(राजभवनस्य सभाकक्षम् । यत्र सर्वे ऽ पि संस्कृतविद्वांसः सभ्या नागरिकाश्च यथास्थानं संस्थिता दृश्यन्ते तत्रैवेत्थं प्रकारेण प्रचलन्ती श्रूयेते संस्कृत-वाङ्मयप्रवर्धनपरा चर्चा , परिचर्चा च ।)

एको विद्वान्- (सहर्षगद्गदम्) धन्यो ऽ सौ नेपालनरेशः साधुवादार्हः, यदयं संस्कृतवाङ्मयं विवर्धयिषुस्तत्प्रदत्तमना इत्थं व्यग्रो दृश्यते । कथं वा कैः कैरुपायैर्वा तस्य सार्वकालिकीः समृद्धिः सञ्जायते? इति नरेशस्या ऽ स्य मननविषयभूतो ऽ यं विषयो ऽ न्तर्मनस्यहर्निशं वर्धत इति चाप्यस्माकं हर्षस्य स्थानम् ।

अन्यो विद्वान्- शोभनम् ! अस्मत्पूर्वजैर्नेपालवासिभिः परिरक्षितां संस्कृतसंस्कृतिं पाश्चात्य-संस्कृत्यनुगतप्रायां विभाव्यतां शनैः शनैः परिहर्तुकामो ऽ भिवर्धयितुं च प्राच्यां-मित्थमद्य विषयेऽस्मिन् विचारविमर्शार्थं

वयमत्राकारिताः । अस्माकं कृते यच्छो-
भनतममेव तन्नेपालनरेशविचारानुसारि-
भिरस्माभिरपि यथा सा परिवर्धत
उज्जृम्भते च सर्वतस्तथैवाचरणीयम् ।
स्वाभिप्रायोऽपि तदनुकूल एव प्रकटयि-
तव्यः । येनास्माकं सदिच्छापि परिपूर्णा
प्रभवेदुत्तरकालस्य कृतेऽपि ।

(तावदेव नेपथ्यात् समागतोऽधस्तनः शब्दराशिः श्रूयते " सभ्यवरा महानुभावाः ! संप्रदत्तावधाना भवन्तु । यदसौ महाराजाधिराजः श्री ५ महेन्द्रवीर-विक्रमशाहः सभामध्यं समागच्छति ।)

(ततः प्रविशति तथोक्तो राजा महेन्द्रवीरविक्रमः शरीरसंरक्षकैः राजपुरुषैः परिवेष्टितः । सर्वेऽपि सभ्याः स्वासनादुत्थायाऽभिवादनं समर्पयन्ति तस्मै । ततः सोऽपि तत्रत्यं स्वोचितं शुभासनमलङ्कुर्वन् तिष्ठतु सर्वेषु सभासदः सम्बोध्येत्थं स्वाभिप्रायं प्रक-टयति ।)

श्री५महेन्द्रः- सभ्यवरा विद्वत्प्रवराः! यत्किञ्चिच्छ्रावयामि तत्रभवद्भ्यस्तत्सर्वमपि सावधानत्वेन श्रोतव्यं भवद्भिः । तत्र स्वाभिप्रायमपि प्रकटयन्तु । गभीरतमोऽयं विषयः संस्कृत-

शिक्षायाः प्रचारप्रसारगर्भकः । अनादि-कालादारभ्याऽद्यावधि सर्वत्र प्रसरन्ती संस्कृतशिक्षेयं भूर्लोकव्यापिनी सञ्जातेति पश्यामि च तां तथाभवन्तीम् बहुषु देशेषु भ्रामं भ्राममहं दर्शं दर्शं च तत्रतत्र त्यां विद्वज्जनमनो ह्लादिनीं संस्कृतशि-क्षाया रीतिस्थितिं च नित्य-नैमित्तिक-सत्कर्मपरिपालनरूपिणीं जिज्ञासुभिः पाश्चात्यविद्वद्भिरपि तांप्रति प्रदर्शितां प्रीतिं तदध्ययनप्रगाढानुरागिताञ्च विभा-व्यैव मदन्तरात्मनि विचारोदयोऽयं प्रा-दुरभूत्—यद्योजनाबद्धरूपेणैवास्याः संस्कृ-तशिक्षायाः कार्यान्वयीकरणपूर्वके तत्प्रयोग एव वयं विषयेऽस्मिन् सफला भवि-ष्यामः केवलं पञ्चविंशतिहायनाऽभ्यन्तर एवेति सुदृढो मद्विचारः । एतादृशेनैव सत्प्रयोगेण भविष्यत्कालिका अस्मद्राष्ट्रि-यबालका अपि प्रबुद्धतमा बुधवरा—

भविष्यन्तीति वितर्कयामि । तदत्र वदन्तु भवन्तोऽपि संस्कृतशिक्षा कीदृशीभवेत् कथं वा भवेदिति । मया किं किं करणीयम् । के के वा सहयोग-साधने सम्पादयितव्ये ?

एको बुधः (सभ्ये समां संबोध्य) स्वस्ति भवते । यद्भवान् संस्कृतवाङ्मयपरिवर्धन वैषयिकं प्रस्तावमिममस्माकं पुरः स्थापयति । राष्ट्रियमहापुरुष ! मत्कथनमिदं दुरुक्तमत्युक्तं वा न मन्यन्ते इमे नेपालनरेशानामाध्यक्षे संस्थिताः सभ्यवरा विद्वांसश्चेत् प्रतावितोऽयं विषयो विशालायामेकस्यां विद्वज्जनसभायां संस्थाप्य ततो निर्णयज्ञाकं प्रतिवेदनं गृहीत्वा तदनुसाधनरण एवाऽति सुखदा भविष्यतीति मन्ये ।

श्री ५ महेन्द्रः बाढम् ! समुचितं कथितं भवता । विषयमपुमेवोहिश्य प्रस्तावित संस्कृतविश्वविद्यालयं लक्ष्यीकृत्य सपत्त्यन्वलान्तर्गत दाङ्गस्थ विजौरीप्रदेशेऽमुकतिथितोऽ -

मुक्तितिथिपर्यन्तं विद्वत्सम्मेलनं भविता। तत्र श्रीमतां विद्वत्प्रवराणामुपस्थितिरवश्यमेव सभाभूषणायिताप्रभवेदस्माकं सन्मार्गप्रदर्शिनी सदिच्छापरिपूर्ति कारिणी चेति सुस्पष्टमुल्लिख्याऽऽकारयितव्या भारतीयाः पूज्यतमा महात्मानो विद्वांसोऽस्मद्देशीयाश्च प्रायेण सर्वेऽपि। अत्रैव शिक्षायोजनायाः प्रारम्भः, वैज्ञानिकरूपेण संस्कृतशिक्षाशिक्षणम्, तदनुसन्धानम् प्रास्ताविकत्वेन संस्थायाः सभायाः पुरतो ज्ञानविज्ञानयोः समन्वयीकरणविषया अपि विमर्शयितव्याः। तत्रत्यव्ययभारो राष्ट्रिय कोशेनैव परिवहनीयः। एतेषां संस्कृतविदुषां स्वागतसन्मानविषये मा नाम भवेत्काऽपि त्रुटिरशोभनीयो व्यवहारश्च। पुनरस्मिन्नेव शुभावसरे नेपालराजधानीत आग्नेयकोणे जनकपुराञ्चलस्थे मटिहानीप्रदेशे प्रचलन् संस्कृतविद्यालयोऽद्यत एव महाविद्यालये परिणतो भवतु।

तत्रत्याश्छात्रा अपि छात्रावासीयव्यवस्थानुरूपं पठन्तु संस्कृतविद्यां भोजनाच्छादनादिकं सर्वमावश्यकं वस्त्ववाप्य . तदन्य एको "नेपालवेदविद्याश्रमः,, इति नाम्ना प्रख्यापित ब्राह्मणवटूनां कृते भोजनाच्छादनादिसुव्यवस्थासम्पन्नो विद्यालयोऽपि पाशुपतक्षेत्रान्तर्गते वनकालीप्रदेशे समुद्घाटितो भवतु । यस्मिंश्च कुर्वन्तु छात्राः ससुखं वेदवेदाङ्गानामध्ययनम् सैषा सभाऽपि विसर्जिताद्य सञ्जायमाने विद्वज्जनसम्मेलनावसरे यो वा निर्णयो भवन् दृश्यते तदनुसारमेव विषयेऽस्मिन् कर्तव्यं निर्धारयिष्यतेऽस्माभिर्युष्मत्सद्विचारानुसरद्भिः । (इति राजा स्वान्तः पुरं प्रविशति । अन्ये सर्वेऽपि बहिर्गच्छन्ति) ।

पटाक्षेपः

इति विशदृश्यम्

एकविंशदृश्यम्

(ततो दृश्यते वाराणसेयं गाङ्गं तटं पञ्चगङ्गास्थम् यत्र भारतीया नेपालीयाश्च युवानो वृद्धास्तदितरे संस्कृतविद्वांसश्च सम्पाद्यमानस्वसत्क्रिया दरीदृश्यन्ते ।) विश्रूयते चेतस्ततो गङ्गातटपरिसरेषु स्नानार्थिभिः क्रियमाणोऽस्पष्टः शब्दराशिः । तत्रैव भारतीयैः संस्कृतविद्वद्भिः सस्कृतविद्यार्थिभिश्च परस्परं संभाव्यमाणा जिज्ञास्यमानाश्च तदन्यैर्नागरिकैः संप्रदत्तकर्णा विविधावार्ताः प्रचक्रन्तीत्यंभूतप्रकाराः ।)

एकोभारतीयः (दन्तधावनपूर्वकं समीपमुपसर्प्य) भो विद्वद्वर ! भवांस्तु हिन्दूधर्मावलम्बिभिर्नेपालेश्वरैः श्री ५ महेन्द्रवीरविक्रमैरायोजिते प्रस्तावितसंस्कृतविश्वविद्यालयीयविशिष्टसंस्कृतविद्वद्वरसम्मेलने पश्चिमनेपालदाङ्गप्रदेशस्थित विजौरी प्रदेशं गत आसीदिति श्रूयतेस्माभिः कदा वा प्रतिनिवृत्तो भवान् ? सभायां तस्यां किं किमभूत् । के के वा भारतीया बुधवरास्तत्र गता आसन ? तेषां स्वागतसन्मानादिव्यवस्थाः कीदृश्योऽदृश्यन्त? एतत्सर्वं विस्तरेणैव शुश्रूषवः स्मः । कृपया स्फुटीकुर्वन्तु भवन्तः ? ।

अन्यो भारतीयः बाढम् ! समुचितं स्पृष्टो ऽस्मि । श्रूयतां तत्रत्यं वृतान्तं यथाभूतं याथातथ्येनैव वच्मि । [तत्रत्याः सर्वेऽपि संप्रदत्तकर्णा-दृश्यन्ते।] नेपालनरेश श्री ५ महेन्द्राज्ञया कृतया सुव्यवस्थया वाराणसेया जगद्-गुरवः शङ्कराचार्या महेश्वरानन्द सरस्व-तीमहोदयाः करपात्रिप्रधाना अस्मदादयश्च नेपालीयं वायुयानमधिरुह्य तत्रत्यं दाङ्ग प्रदेशमुपस्थिताः । ततस्तत्रोपस्थितैराज-पुरुषैरन्यैश्च विशिष्टपुरुषैर्विद्वद्भि र्विहित-सत्स्वागतास्तत्रत्यतृणपर्णादिभिः सद्यो-र्निर्मितेषु कुटीरेषु संस्थापिताः । अस्माकं कृते सम्पादिता भोजनादिव्यवस्थापि शो-भनतमैवासीत् । भारतीय"लखनउ"प्रदे-शात् बहुविधानि फलान्यपि चानितानि सन्ति स्म सुमिष्ठानि । यो यदिच्छति-तस्य तदित्युक्तिमनुसृत्यास्मान् सत्कृतवान् नेपालनरेशो महेन्द्रः तत स्तत्सभोद्घाटनं

सम्पाद्य विन्यस्य च तद्वैषयिकं स्वप्रस्ताव गतेऽस्मिन् नेपालनरेशे द्वितीयदिनात्प्र-
वृत्ते तत्प्रस्तावितसंस्कृतविश्वविद्यालयीय विद्वत्सम्मेलनमहोत्सवे विदुषां विविधा विचारविमर्शा अश्रूयन्त प्राच्यसंस्कृतसंस्कृतिप्रवर्धनपराः । यत्र पूज्या जगद्गुरवः शङ्कराचार्याः करपात्रि हरिहरानन्दप्रमुखाश्च यदुक्तवन्तस्तत्सर्वाण्येव प्रमाणरूपेण सुष्ठुतमानि योजनावद्ध संस्कृतशिक्षानुरूपाणि च भवितु मर्हन्तीति तत्रोपस्थितैः सम्बद्धविद्वद्भिरुट्टङ्कितानि । पुनः सायङ्काले याथातथ्येन मृच्छकटिकाभिधेयं संस्कृतनाटकमपि तत्रत्यैः संस्कृतविद्यार्थिभिरभिनीय प्रदर्शितम् । नाटकस्याऽस्य तत्क्षण एव नेपालीभाषानुवादिता वाक्यांशाः कृष्णप्रसादधिमिरे महोदयेनैव मध्ये रङ्गमञ्चं समागत्य तन्म-

होत्सवदर्शनार्थं समागतेभ्यो दर्शकेभ्यः सुश्रावितः । ततः समाप्य तत्रत्यं कार्यजातं वयं यथा गताः स्म तथैव पुनरत्रागताः । अतः संस्कृतशिक्षेयं समयेन विवर्धमाना दृश्यते ।

प्रथमः तद्धन्यो ऽसौ नृपतिः ।

[इति सर्वेऽपि स्वस्वकर्मणि संलग्ना भवन्ति]

पटाक्षेपः

इति एकविंश दृश्यम्

द्वाविंशं दृश्यम्

(वर्तमानोऽसौ नेपालनरेशः श्री ५ वीरेन्द्रवीर-विक्रमो महाराजाधिराजः । अस्य राज्यसिंहासनारोहणकालो वि. सं. २०२८ तः प्रवर्तते)

(ततः प्रविशति सुप्रतिष्ठो नेपालीयः संस्कृतशिक्षासु संप्राप्तसद्विचारः कश्चिज्जिज्ञासुर्युवा)

युवा (इतस्ततो भ्रमन्) संस्कृतशिक्षायाः प्रचारः प्रसारश्च प्रायशो ह्रासमिताविव दृश्येते । काकोऽपि विकराल इव प्रवृत्तः । धिक्-कष्टम् ! लार्ड मेकालेमहोदयस्यैवेयं नीतिः सर्वत्रैवं प्रवर्धमानैव जरीजृम्भते । विशेषतः पाश्चात्त्यसंस्कृतिप्रियः एव प्राच्यसंस्कृतिप्रियान् निरन्तरं बाधन्ते । तन्नीतिरेव सर्वत्र प्रसरन्ती भूलोकस्थान् सर्वानपि स्वरूपेणवाऽभिव्याप्य वर्धतेतराम् । वयमत्रत्या अपि तादृशप्रायाः सञ्जाताः । काकथाऽस्माकं पुत्रपुत्र्यादीनान्तु महद्दुःखमेतत् । को वा महापुरुष आत्मानं स्वविवेकबुद्धया सन्नीत्या च संस्कृतसंस्कृतिं सम्यक् प्रचार्य्य प्रसार्य्य च

सर्वत उद्धरिष्यति । विषयेऽस्मिन् भृशं परिपीड्यमानं मे मनो ऽहर्निशं सचिन्तं वरीवर्ति । [उर्ध्वमवलोक्य] किम् ? किमुच्यते ? दत्तावधानो भूत्वा मद्वचनंशृण्विति । आम्! प्रदत्ते एव वर्तेते मत्कर्णयुगले । किं नाऽसौ वर्तमाननेपालनरेशः श्री ५ वीरेन्द्रवीरविक्रम वर्मा महापुरुषः? येन संस्कृति संस्कृतयोः प्रवर्धने स्वं मनो न प्रदत्तम्? किं वा राष्ट्रियशिक्षापद्धतेर्योजनायां संस्कृतशिक्षा राष्ट्रियशिक्षात्वेना ऽपि न समर्थिता ? । पुनरनेनैव भो ! श्रूयताम् ! संस्कृत शिक्षायाः शिक्षणेऽध्यापने च व्यवसायमूलत्वमनुसन्धानोन्मुखत्वञ्च नाविष्कृतम् ? सम्पूर्णैव संस्कृतशिक्षा निःशुल्कीकृता । इत्थं तद्रक्षणे वर्धने च संप्रदत्तचेताः किं न तद्योशोभाजनम् ? [सभ्यानवलोक्य]

आस्तांतावत् । यद् भावि तद्भवतु । काल एव अत्र कारणम् न राजा नैताः, प्रजाः । तद्गच्छाम्यधुना ।

(इति बहिर्गच्छति)

प्रटाक्षेपः

इति द्वाविंशं दृश्यम्

इत्थं समाप्तं नाटकमिदम् ।

मुद्रकः-संस्कृत छापाखाना बेलगुण्डी दाज़